दैनिकम् ई-संस्कृतवार्तापत्रम्
# हिमसंस्कृतवार्ता

**पञ्चाङ्गम्**
वि.सं. २०८३,
कलियुगाब्धः ५१२७ वर्षा-ऋतुः
सूर्यः दक्षिणायनम् भाद्रपदकृष्णप्रतिपदा
भाद्रपद 13 प्रविष्टांशः मङ्गलमयः भवेत्

■ पृष्ठ-09 ■ वर्ष-5 ■ अङ्क-310 | 1 | अगस्त 29, 2026 | Website- www.himsanskritam.com | Email-himsanskrit@gmail.com

2 हिमाचले रक्षाबन्धन-पर्वणि महती सान्त्वना; सेवानिवृत्त- चतुर्थश्रेणी-कर्मचारिणां कौटुम्बिक- निवृत्तिवेतन-भोक्तृणां च कोषेषु विंशतिकोटि- रूप्यकाणि

4 आगरा-नगरे राजाबलवन्तसिंह-महाविद्यालये, संस्कृतसप्ताहसमापनसमारोहः आजोजितः

9 लोकसभायां ५४३ सदस्यसङ्ख्या किमर्थं ५४३ एव भवेत्?

## जन-धन योजना देशस्य-आर्थिक-सशक्तीकरणाय क्रान्तिकारी-भूमिकां निर्वहति - प्रधानमन्त्री




प्रधानमन्त्री-जनधन-योजना 'प्रधानमन्त्रि-जन-धन-योजनायाः' द्वादश वर्षाणि पूर्णतां गतानि। दश-वित्तीय समावेशनस्य परिदृश्य-परिवर्तन-दिशि अयं हि कश्चन महत्त्वपूर्णः पदक्रमः वर्तते चतुर्दशाधिक-द्विसहस्र-तम वर्षे अस्मिन् एव दिने प्रधानमन्त्रिणा नरेन्द्र-मोदिना एषा योजना समारब्धा। प्रधानमन्त्रिणा उक्तं यत् विगत द्वादशसु वर्षेषु जनधन-योजनायाः अभूतपूर्व-परिवर्तन-कारिणां परिणामानां प्रभावः अद्भुतः अस्ति। सामाजिकान्तर्जाल-पटले श्रीमोदी अलिखत् यत् जनधन-योजना वित्तीय समावेशं सम्वर्धयितुं देशस्य जनान् शक्तिकर्तुं च महत्त्वपूर्णां भूमिकां निर्वहति। प्रधानमन्त्रि-जनधन-योजनायाः अन्तर्गतम् अधुनावधि ऊनषष्टि- कोटितोऽपि अधिकाः उद्घाटिताः। अत्र लेखासु आहत्य सप्तदश-सहस्राधिक-त्रिलक्ष-कोटि-रूप्यकाणि स्थापितानि सन्ति। इयं योजना विश्वस्य बृहत्तमा वित्तीय समावेश परिकल्पना-रूपेण विद्यते एषा योजना सर्वेभ्यः भारतीयभ्यः बैंक-प्रवशं सुकरं करोति।

## अद्यतनीयं सुभाषितम्

**परनेयोऽग्रणीर्यस्य स मार्गान्प्रतिमुह्यति।**
**पन्थानमनुगच्छेयुः कथं तस्य पदानुगाः।।**
**(महा. सभापर्व- ५५/०४)**

अर्थात्- जिस दल का अगुआ दूसरे की बुद्धि पर चलता हो, वह अपने मार्ग में सदा मोहित होता रहता है। फिर उसके पीछे चलने वाले लोग अपने मार्ग का अनुसरण कैसे कर सकते हैं?

हिमसंस्कृतवार्तापत्रस्य एकवर्षस्य सदस्यता १००₹
One year subscription to the daily Sanskrit newspaper is Only 100 Rupees
To subscribe, text us a message saying hello on the number below.
7876636263
कार्यालयः, हिमसंस्कृतम्, प्रकाशनम्
जसवां कोटला तहसीलपरिसरस्य सम्मुखे कस्बा कोटला जिला कांगड़ा हि.प्र.
पत्रव्यवाहरसङ्केतः-१७७१११ कार्यालीयः सम्पर्कः- शिवानी शर्मा 7876636263
सूचना- हिमसंस्कृतवार्ता दैनिकपत्रे व्याकरणात्मक-अशुध्दीनां कृते, राजनैतिक-सांस्कृतिकविचाराणाञ्च कृते सम्बद्धाः पत्रकाराः लेखकाश्च उत्तरदायिनः भविष्यन्ति
संपादकगणः- डॉ.अमनदीपशर्मा, डॉ.मनोज शैलः, डॉ.अमित शर्मा, डॉ.नरेन्द्रराणा,
प्रचारगणः- जगदीश डाभी, शिवा शर्मा, वत्सदेसराजः, डॉ.पद्मनाभः, डॉ.अभिषेकशर्मा

## भ्रातृ-भगिन्योः अगाध स्नेह सम्बन्धस्य प्रतीक-भूतं रक्षाबन्धन पर्व समग्रे देशे महोल्लासेन आचरितः

भ्रातृ-भगिन्योः अगाध स्नेह सम्बन्धस्य प्रतीक-भूतं रक्षाबन्धन पर्व समग्रे देशे महोल्लासेन आचरितः। अस्मिन् पावनावसरे राष्ट्रपतिना, उपराष्ट्रपतिना अथ च प्रधानमन्त्रिणा नवदेहल्यां विभिन्नानां विद्यालयानां संस्थानां च छात्रैः बालकैश्च सह इदं पर्व सोत्साहं समनुष्ठितम्।

## प्रधानमन्त्री उज्बेकिस्तानस्य द्वि-दिवसीय-प्रवासाय ताशकन्द-नगरं गमिष्यति

प्रधानमन्त्री नरद्रमोदी अद्य उज्बेकिस्तानस्य द्वि-दिवसीय-प्रवासाय ताशकन्द-नगरं गमिष्यति। यात्रा-काले प्रधानमन्त्री उज्बेकिस्तानस्य राष्ट्रपतिना शौकत मिर्जियोय वर्येण सह उच्च-स्तरीय वार्ता करिष्यति। अस्याः वार्तायाः मुख्यम् उद्देश्यं भारत-उज्बेकिस्तानयोः रणनीतिक सम्बन्धान् नूतनाम् उच्चतां नेतुम् अस्ति।

## नेपाले अनुवर्तमानानि साहाय्योद्धार कार्याणि उद्दिश्य चर्चाम् अकरोत् जयशंकरः

विदशमन्त्री डॉ. सुब्रह्मण्यम् जयशंकरः नेपाले अनुवर्तमानानि साहाय्योद्धार कार्याणि उद्दिश्य चर्चाम् अकरोत्। एकस्मिन् सामाजिकान्तर्जाल-पटले डॉ. जयशंकरः अवदत् यत् काठमाण्डु-बीजिंगयोः वर्तमानाभ्यां भारतीय-दूतावासाभ्यां भारतीय-नागरिकाणां स्थिति-विषये सद्यस्तन-सूचनाः उपलम्भिताः।

## उपराष्ट्रपतिः सहैव प्रधानमन्त्री विश्व-संस्कृत-दिवसस्य पावन पर्वणि देशवासिभ्यः शुभाशयाः प्राकटयताम्



उपराष्ट्रपतिः सी.पी. राधाकृष्णन् सहैव प्रधानमन्त्री नरेन्द्र-मोदी विश्व-संस्कृत-दिवसस्य पावन पर्वणि देशवासिभ्यः शुभाशयाः प्राकटयताम्। सामाजिक सञ्चालीय-सन्देशे उपराष्ट्रपतिः राधाकृष्णन् प्रावोचत् यत् संस्कृतं भारतीय ज्ञानस्य, दर्शनस्य, सभ्यतायाश्च शाश्वती भाषा वर्तते । अनया देशस्य समृद्ध सांस्कृतिक-न्यासः बौद्धिक परम्परा च संरचिता। सः जनान् निवेदितवान् यत्त संस्कृतस्य अमूल्य-निधेः संरक्षणं, सम्वर्धनं, प्रसारणं च कुर्युः सहैव आगामि-वंशं एतया शाश्वत-ज्ञान-परम्परया च सह योजयेयुः येन आधुनिक-जगति अस्य महत्त्वं वर्धयेरन् । अपरत्र, प्रधानमन्त्री नरेन्द्रमोदी न्यगादीत् यत् संस्कृत-भाषायाः शाश्वत-वैभवस्य आचरणार्थं श्रावण पूर्णिमायां विश्व-संस्कृत-दिवसः आचर्यते । सः न्यवेदयत् यत् संस्कृतं भारतीय ज्ञानस्य, चिन्तनस्य, सृजनशीलतायाश्च निरन्तरं वाहिका समजायत, अस्याः सकारात्मकः प्रभावः अद्यापि बहुषु क्षेत्रेषु दृश्यते । प्रधानमन्त्रिणा भारते समग्र-विश्वस्मिन् च संस्कृतस्य अध्ययनाध्यापने संलग्नानां अथ च अस्याः शाश्वत-सम्पदः आगामि-वंशे प्रसाराय कार्यरतानां सर्वेषां विदुषां साधकानां च भूरिशः प्रशंसा कृता।

## नेपाल-तिब्बतयोः भीषणाप्लावेन मृतकानां सङ्ख्या अष्टत्रिंशत्यधिक-पंचशतं जनाः यावत् अभवत्, सार्धैकसहस्रतोप्यधिकाः जनाः विलीनाः



नेपाल-तिब्बत-सीमायां विनाशकारिणा जलौघेन मृतानां सङ्ख्या समेध्य अष्टत्रिंशत्यधिक पंचशतं जाता। सीमायाः उभयतः साम्प्रतम् अपि पञ्चचत्वारिंशदधिक-पञ्चशतोत्तरैक-सहस्रं जनाः विलुप्ताः सन्ति। साहाय्योद्धार-दलानि नदी-तीरेषु पृथेक्षु वसतिषु च जीवितान् जनान् अन्विषन्ति । ते जलौघेन प्रवहित-शरीराणि अन्विष्य आनयन्ति। परन्तु भोटेकोशी नद्याः उद्म-स्थलं निकषा नवनिर्मितं जलबन्ध-युतं सरोवरम् आलक्ष्य सम्प्रति चिन्ता प्रवर्तते । अधिकारिणः शङ्काकुलाः सन्ति यत् जलबन्धस्य विलोपेन पुनरेकदा कश्चन भीषणः शक्तिशालि-जलप्रवाहः आगन्तुम् अर्हति। अनेन आपद्-वर्धनं, साहाय्योद्धारकार्यं च प्रबाधितं भविष्यति। अधुनावधि नेपालस्य सुरक्षा कर्मिणः प्रभावित जनपदेभ्यः अष्टशताधिकान् जनान् सुरक्षित-स्थानेषु प्रापितवन्तः ।

## वित्त-मन्त्री निर्मला सीतारमण षड्-दिवसीय प्रवासाय यू.एस. प्रस्थिता




केंद्रीय-वित्तमन्त्री निर्मला सीतारमण इत्येषा संयुक्तराज्यस्य षड्-दिवसीय-सर्वकारीय-यात्रायां भविष्यति। स्वकीय-अमरीका-यात्रावधौ सा शिकागो-ऐशविल न्यूयॉर्क नगराणां प्रवासं करिष्यति। शिकागो-नगरे वित्तमन्त्री प्रमुख-निवशकैः सह एकायां गोलमेज-सङ्गोष्ठ्यां भागं ग्रहीष्यति अथ च अशासकीय क्षेत्रस्य प्रमुखैः मुख्य कार्यकारी अधिकारिभिः, अध्यक्षः, वरिष्ठ-प्रतिनिधिभिः च सह सम्भाषणं विधास्यति। अस्यां यात्रायां सा शिकागो-नगरस्थैः भारतीय-समुदायस्य जनैः सह अपि संवादं करिष्यति।

ऐशविल-नगरे श्रीमती सीतारमण अमरीका-देशस्य अध्यक्षतायां आयोज्यमाने जी-विंशति वित्तमन्त्रिणां तथा केंद्रीय-अधिकोष-प्रशासकानां उपवेशने भारतीय-प्रतिनिधि-मण्डलस्य नतृत्वं विधास्यति। अयं कार्यक्रमः समसामयिक-वैश्विक-आर्थिक-आव्हानानां सम्मुखीकरणे भारतस्य दृष्टिकोणानां पुरोधाय अथ च जी-विंशतिः सहभागिभिः सह सहयोगं सुदृढीकर्तुं भारताय उत्तमम् अवसरं प्रदास्यति । ततः परं न्यूयॉर्क-नगरे श्रीमती सीतारमण तत्रस्थानां प्रमुखाणां समवायानां मुख्यकार्यकारी-अधिकारिभिः वरिष्ठ-प्रतिनिधिभिः च सह निवेश-गोलमेज सङ्गोष्ठ्यां भागं ग्रहीष्यति।

# हिमाचले रक्षाबन्धन-पर्वणि महती सान्त्वना;

## सेवानिवृत्त- चतुर्थश्रेणी- कर्मचारिणां कौटुम्बिक-निवृत्तिवेतन- भोक्तॄणां च कोषेषु विंशतिकोटि- रूप्यकाणि

**हिमसंस्कृतवार्ताः- शिमला।**
राज्यसर्वकारेण विद्युत्-मण्डलस्य सेवानिवृत्त-चतुर्थश्रेणी- कर्मचारिभ्यः कौटुम्बिक- निवृत्तिवेतन-भोक्तृभ्यः च महतीं सान्त्वनां प्रयच्छता विंशतिकोटि-रूप्यकाणां राशिः प्रसारिता। अनेन सहैव एषा राशिः निवृत्तिवेतन- भोक्तृणां वित्तकोषसंख्यासु अपि सम्प्राप्ता। रक्षाबन्धनस्य पावनपर्वणि प्रदेशस्य सुक्खूसर्वकारेण एतस्याः श्रेण्याः निवृत्तिवेतन-भोक्तृणां कृते अवशिष्टराशिं प्रदातुं महोपहारः प्रदत्तः।

मुख्यमन्त्री सुखविन्दरसिंहसुक्खु-महोदयः अवदत् यत् विद्युत्-मण्डलस्य चतुर्थश्रेण्याः सर्वेषां निवृत्तिवेतनभोक्तृणां कौटुम्बिक- निवृत्तिवेतन-भोक्तृणां च अवशिष्टराशेः भुक्तिः कृता अस्ति। सः न्यवेदयत् यत् समग्रराशिः साक्षात् तेषां वित्तकोषेषु प्रेषिता। मुख्यमन्त्रिणा प्रोक्तं यत् सेवानिवृत्त-कर्मचारिभ्यः तेषां वैधानिक-वित्तीयलाभाः समये एव प्रापणीयाः, अस्यैव उद्देश्यस्य पूर्तये एतत् पदं स्वीकृतम्।

### कर्मचारिणां समर्पणस्य सम्मानम्-

मुख्यमन्त्री अवदत् यत् एतैः निवृत्तिवेतन-भोक्तृभिः स्वसेवाकाले वर्ष- पर्यन्तं प्रदेशस्य विद्युत्-व्यवस्थां सुदृढां विधातुम्, उपभोक्तृणां च कृते निरन्तर-विद्युत्प्रवाहं सुनिश्चितं कर्तुं महत्त्वपूर्णा भूमिका निर्वोढा तैः स्वजीवनस्य महत्त्वपूर्णः समयः विद्युत्- मण्डलस्य सेवायां समर्पितः।




एतादृशानां कर्मचारिणां तेषां परिवाराणां च सम्मानस्य अधिकाराणां च रक्षणं सर्वकारस्य प्राथमिकम् उत्तरदायित्वं वर्तते।

मुख्यमन्त्रिणा स्पष्टीकृतं यत् प्रदेशस्य कर्मचारिणः निवृत्तिवेतन-सहिताः परिवाराश्च सर्वकारस्य प्राथमिकतायां सन्ति। कर्मचारिणां निवृत्तिवेतन-भोक्तृणां च हितानां रक्षणाय, तेषां वित्तीय- विषयाणां समाधानाय, लम्बितानां देयतानां भुक्तये च सर्वकारः निरन्तरं प्रयासं कुर्वन् अस्ति।

उल्लेखनीयं वर्तते यत् साम्प्रतं विद्युत्- मण्डल-प्रबन्धनेन विगतदिवसेषु चतुर्थश्रेण्याः सेवानिवृत्त-कर्मचारिणां कौटुम्बिक-निवृत्तिवेतन-भोक्तृणां च लम्बितावशिष्ट-राशि-सम्बद्धानाम् औपचारिकताणां पूर्त्यै अधिकारिभ्यः निर्देशाः दत्ताः आसन्। अस्तु, रक्षाबन्धन-पर्वणः अवसरे राज्य-सर्वकारेण एतेषां निवृत्तिवेतन-भोक्तृणां वित्तकोषसंख्यासु राशिं प्रसार्य महती सान्त्वना दत्ता

# टैक्सी-सञ्चालकानाम् अनशनं समाप्तम्




## विपक्षनेत्रा जयराम-ठाकुरेण फलरसं पाययित्वा स्थगित-मान्दोलनम्

हिमसंस्कृतवार्ताः- शिमला।
राजधान्याः शिमलायाः 'चौड़ा-मैदान' स्थले अनुज्ञापत्रस्य कालावधिवर्धनस्य याचनाम् अधिकृत्य बहुभ्यः दिनेभ्यः प्रचलत् टैक्सी- सञ्चालकानाम् आन्दोलनं शुक्रवासरे समाप्तं जातम्। पूर्वमुख्यमन्त्री विपक्षनेता च जयरामठाकुरः आन्दोलनस्थलम् उपगम्य आमरण- अनशने उपविष्टैः टैक्सी-सञ्चालकैः सह वार्ताम् अकरोत् तेषां याचनाः च अशृणोत्। सञ्चालकानां समस्यानां याचनानां च यथासम्भवं पक्षपोषणस्य आश्वासनं दत्त्वा जयरामठाकुरेण फलरसं पाययित्वा आन्दोलनं समाप्तं कारितम्।

अस्मिन् समये जयरामठाकुरः टैक्सी-सञ्चालकान् आश्वासयत् यत् अयं विषयः केन्द्रीयमन्त्रिणः नितिनगडकरीमहोदयस्य समक्षं दृढतया उत्थापयिष्यते। अस्मात् पूर्वं जयरामठाकुरस्य नितिनगडकरीमहोदयेन सह दूरभाषमाध्यमेन वार्ता अपि जाता आसीत्। नितिनगडकरी-महोदयेन आश्वासनं दत्तं यत् हिमाचलात् यत्किमपि प्रपत्रम् आगमिष्यति, तस्मिन् एक-होरायाः अभ्यन्तरे उचितः निर्णयः करिष्यते। जयरामठाकुरेण सह विचारविमर्शानन्तरं सञ्चालकाः अपि स्व-आन्दोलनस्य समापने सहमतिं प्राकटयन्।

### अनुज्ञापत्र-कालावधेः वर्धनस्य याचना-

'टैक्सी-मैक्सी-ऑपरेटर-एसोसिएशन' मनाली-संस्थायाः अध्यक्षः अभीठाकुरः विज्ञापितवान् यत् सञ्चालकानां प्रमुखतमा याचना व्यावसायिक-वाहनानाम् अनुज्ञापत्रस्य कालावधिं १२ वर्षेभ्यः १५ वर्षं यावत् वर्धयितुम् अस्ति। तेन प्रोक्तं यत् पर्वतेषु प्रचलन्ति अधिकांश-वाहनानि १२ वर्षानन्तरमपि पूर्णतया सुदृढानि भवन्ति, अधिकं दूरम् अपि न चलितानि भवन्ति। किन्तु वर्त्तमान-नियमानां कारणात् तेषां मार्गे चालनस्य अनुमतिः न प्राप्यते, येन वाहन-स्वामिनां पुरतः आजीविकायाः सङ्कटः उत्पद्यते। सञ्चालकानां याचना वर्तते यत् वाहनस्य आयुस्थाने तस्य सामर्थ्यं दृष्ट्वा सञ्चालनस्य अनुमतिः प्रदीयेत।

जयरामठाकुरः अवदत् यत् सञ्चालकानाम् एषा याचना तेन विधानसभायाः वर्षर्तु-सत्रे सर्वकारस्य समक्षम् उत्थापिता। सः अवदत् यत् अनेन सहस्रशः परिवाराणाम् आजीविका सम्बद्धा वर्तते, अतः सर्वकारेण सकारात्मकः निर्णयः करणीयः। सञ्चालकैः उक्तं यत् पर्वतीय-राज्ये नूतन-वाहनस्य क्रयणं सुकरं नास्ति। यदि पुरातनं वाहनं समर्थम् अस्ति, तर्हि केवलं कालावधि-पूर्तेः आधारेण तत् निष्कासयितुं व्यावहारिकं नास्ति।

### लोकयानानाम् अन्यानां च वाहनानां नियमेषु परिवर्तनस्य याचना

टैक्सी-सञ्चालकैः सहैव हिमाचलप्रदेशे लोकयानानां, भारवाहकवाहनानां, त्रिचक्रिकाणां, मालवाहकानां च वाहनानाम् अनुज्ञापत्र-नियमेषु परिवर्तनस्य याचना अपि उत्थापिता। तैः प्रोक्तं यत् यथा अन्येषु राज्येषु वाहनानां कार्य-क्षमतायाः आधारेण सञ्चालनम् अनुमन्यते, तथैव हिमाचलेऽपि व्यवस्था प्रवर्त्यताम्।

# हिमाचलस्य चामुण्डासंस्कृतमहाविद्यालये राज्यस्तरीय- संस्कृतमहोत्सवस्य कार्यक्रमः जिला उपायुक्तस्य हेमराजवैरवा महोदयस्य उपस्थितौ सम्पन्नः







**हिमसंस्कृतवार्ताः**-संस्कृतदिवसस्य अवसरे हिमाचलप्रदेशस्य भाषा- कला- संस्कृतिविभागेन कांगड़ामण्डलस्य प्रसिद्धे चामुण्डा स्थिते संस्कृतमहाविद्यालये राज्यस्तरीय- संस्कृतमहोत्सवस्य आयोजनं कृतम्। अस्मिन् कार्यक्रमे कांगड़ामण्डलस्य उपायुक्तः हेमराजवैरवः मुख्यातिथिरूपेण उपस्थितः आसीत्। वैरवः स्वोद्बोधने अवदत् यत् संस्कृतभाषा केवलम् इतिहासस्य स्मरणार्थं न भवति, अपि तु वर्तमानपरिप्रेक्ष्ये भारतीयज्ञानपरम्परया सह संयोजनं, नवाचारयुगे अस्याः प्रासङ्गिकता अनिवार्या अस्ति। सः प्रसन्नतां प्रकटयन् अकथयत् यत् भाषाविभागस्य राज्यस्तरीयकार्यक्रमाः प्रायः शिमलायाम् एव आयोज्यन्ते स्म, परन्तु अस्मिन् काले शिमलातः कांगड़ायाम् आयोजनम् अभिनवः प्रयोगः अस्ति। कार्यक्रमे केन्द्रीय- संस्कृत- विश्वविद्यालयस्य बलाहरपरिसरस्य निदेशिका प्रो. सत्यमकुमारी विशिष्टातिथिरूपेण उपस्थिता आसीत्। सा संस्कृतस्य सर्वेषु कार्यक्रमेषु स्वोपस्थितिं सुनिश्चितं कारितवती। सा संस्कृतं धर्मार्थकाममोक्षाणां साधनम् उक्त्वा अवदत् यत् केन्द्रीयसंस्कृतविश्वविद्यालये संस्कृते भारतीय- ज्ञान- परम्परायां बलम् दत्त्वा आयुर्वेदः, योगः, ए.आई. इत्यादीनां विषयाणां सह संयोजनं क्रियते। सा छात्रान् प्रेरयन् अवदत् यत् छात्राः पाण्डुलिपीनाम् आधारेण शोधकार्याय अग्रे आगच्छन्तु, येन पाण्डुलिपीनां ज्ञानं प्रकाशम् आगच्छेत्। प्रथमसत्रे मुख्यवक्तारूपेण काशी- हिन्दू- विश्वविद्यालयस्य आचार्यः वर्तमानसन्दर्भे संस्कृतस्य वैज्ञानिकता, प्रासङ्गिकता च अस्मिन् विषये व्याख्यानं दत्तवान्। सत्रस्य समाप्ताने भाषाविभागस्य साहायकनिदेशकः सुरेशराणा आमन्त्रितान् सर्वान् अतिथीन् हिमाचलस्य शाटिकया टोपिकया स्मृतिचिह्नेन च सम्मानितवान्। प्रथमसत्रस्य कुशलसंचालनम् ऊनामण्डलस्य जिला भाषाधिकारी निक्कूरामः कृतवान्। अस्मिन् अवसरे भाषाविभागेन चामुण्डासंस्कृतमहाविद्यालयस्य प्राचार्यस्य हरीशशर्मणः कार्यक्रमस्य समस्तव्यवस्थायाः कृते विशेषः आभारः प्रकटितः। कार्यक्रमे जिला भाषाधिकारी कांगड़ा अमित गुलेरी महोदयः सर्वेषाम् आभारं प्रकटितवान्।

**संस्कृतमहाविद्यालयानां छात्राणां प्रतियोगिताः** कार्यक्रमस्य द्वितीयसत्रे संस्कृतस्य अन्तरमहाविद्यालयीया भाषण- प्रश्नोत्तरी- अनुवाद- श्लोकोच्चारणप्रतियोगितानाम् आयोजनं कृतम्, यत्र प्रदेशस्य १५ संस्कृतमहाविद्यालयानां लगभग १०० प्रतिभागियों भागं गृहीतवन्तः।

***श्लोकोच्चारणप्रतियोगितायाम्:*** गुञ्जन (राजकीयसंस्कृतमहाविद्यालयः, तुंगेश, शिमला) प्रथमस्थानम्, अनुराधा (सनातनधर्म- आदर्श- संस्कृत- महाविद्यालयः, डोहगी, ऊना) द्वितीयस्थानम्, कोमलशर्मा (केन्द्रीय- विश्वविद्यालय- वेदव्यासपरिसरः, बलाहर, कांगड़ा) तृतीयस्थानम्, सुहानी (राजकीय- संस्कृत- महाविद्यालयः, चम्बा) प्रोत्साहनपुरस्कारं च प्राप्तवती।

**संस्कृतभाषणप्रतियोगितायाम्:** ऋषभः (गोरक्ष- राजकीय- संस्कृत- महाविद्यालयः, नाहन, सिरमौर) प्रथमस्थानम्, आशीषचौहानः (केन्द्रीय- संस्कृत- विश्वविद्यालयः, बलाहर, कांगड़ा) द्वितीयस्थानम्, नीरजः (त्रिगर्त- संस्कृत- महाविद्यालयः, चामुण्डा, कांगड़ा) तृतीयस्थानम्, योगिता (राजकीयमहाविद्यालयः, सुन्दरनगरः, मण्डी) नेहा च (राजकीयसंस्कृतमहाविद्यालयः, चम्बा) प्रोत्साहनपुरस्कारं प्राप्तवत्यौ।

**संस्कृतप्रश्नोत्तरीप्रतियोगितायाम्-** सचिनः (संस्कृतमहाविद्यालयः, तुंगेश, शिमला), अपेक्षा (राजकीय- संस्कृत- महाविद्यालयः सुन्दरनगरः, मण्डी), सुहानी (राजकीय- संस्कृत- महाविद्यालयः, डोहगी, ऊना) संयुक्ततया प्रथमस्थानम्, नेहा (राजकीयमहाविद्यालयः, चम्बा) तमन्ना च (राजकीयमहाविद्यालयः, डोहगी, ऊना) द्वितीयस्थानम्; सानिया (राजकीयमहाविद्यालयः सुन्दरनगरः, मण्डी) खुशी च (संस्कृतमहाविद्यालयः, चकमोह, हमीरपुरम्) तृतीयस्थानम् प्राप्तवत्यौ।

**अनुवादलेखनप्रतियोगितायाम्-** स्नेहावर्मा (राजकीय- संस्कृत- महाविद्यालयः, तुंगेश, शिमला) प्रथमस्थानम्, काजलगाल्टा (आदर्श- संस्कृत- महाविद्यालयः, जांगला, रोहड़ू, शिमला) द्वितीयस्थानम्, मनीषागोस्वामी (केन्द्रीय- विश्वविद्यालयः, धर्मशाला, कांगड़ा) तृतीयस्थानम्, देवांशः च (संस्कृतमहाविद्यालयः, चामुण्डा, कांगड़ा) प्रोत्साहनपुरस्कारं प्राप्तवान्।

## संस्कृत- कविसंगोष्ठ्याः सर्वेषां श्रोतृणां मनांसि जितानि

अस्मिन् अवसरे हिमाचलसंस्कृत-अकादमीतः पूर्वसचिवः डॉ. मस्तरामशर्मा, जगतप्रसादशास्त्री च इत्येतयोः अध्यक्षतायां कवीनां सम्मेलनम् आयोजितम्, यत्र प्रदेशस्य प्रायशः २० संस्कृतकवयः भागं गृहीतवन्तः। काव्यसंगोष्ठ्यां डॉ. मदनमोहनशास्त्री (सोलन), डॉ. सन्तोषकुमार (शिमला), डॉ. मनोजकुमार (मण्डी), डॉ. अमितशर्मा (हमीरपुरम्), डॉ. अमनदीपशर्मा (धर्मशाला), डॉ. पंकज (बलाहर), डॉ. श्रीधरद्विवेदी (बलाहर), डॉ. रूपलालजांग्ला, डॉ. रितेशशर्मा (सरैन), डॉ. मुकेशकुमार (डोहगी), शास्त्रीहिमांशु (मण्डी), आचार्यरत्नचन्द रत्नाकरः (हमीरपुरम्), आचार्यः नरेशमलोटिया (हमीरपुरम्), डॉ. मनोजकुमारः (धर्मशाला), विमलादेवी (चम्बा) च उपस्थिताः आसन्, ये संस्कृते छन्दोबद्धपद्यानां वाचनं कृतवन्तः। कविसम्मेलनस्य अन्ते डॉ. मुकेशः सर्वेषां कवीनां प्रयासान् एकस्मिन् काव्ये रचितवान्, यः श्रोतृभिः प्रशंसितः। कविमण्डलस्य अध्यक्षीयभाषणे डॉ. मस्तरामः छात्रान् कथाप्रसङ्गानां माध्यमेन काव्यस्य महत्त्वं लेखनस्य च विद्यां परिचायितवान्। कविमञ्चस्य सञ्चालनं केवलशास्त्रिणा कृतम्।

अस्मिन् अवसरे राज्य- अभिलेखागारेण ऐतिहासिकदुर्लभपत्राणां प्रदर्शनी तथा हिमाचल- कला- संस्कृति- भाषा- अकादमीतः पुस्तकप्रदर्शनी अपि आयोजिता। पुस्तकप्रदर्शनीयां पाठकानां साहित्यप्रेमिणां कृते हिमाचलस्य इतिहासस्य, कलायाः, संस्कृतेः, विरासतस्य च सम्बद्धाः पुस्तकानि विक्रयार्थम् उपलब्धानि आसन्।



## ड्रोन-सर्वेक्षणं कृत्वा सीमावेष्टनं करिष्यति लोकनिर्माणविभागः, अधुना धरातले भविष्यति काङ्गडा-विमानपत्तनस्य विस्तारकार्यं, सज्जता तीव्रा

**हिमसंस्कृतवार्ताः - काङ्गड़ा।**

प्रदेशे विमानसम्पर्कं पर्यटनं च नूतनान् उच्चस्तरान् प्रति नेतुं समर्थस्य काङ्गडा-विमानपत्तनस्य विस्तारकार्यं अधुना धरातले वेगेन प्रवर्तते। भूम्यधिग्रहणस्य प्रभावितपरिवाराणां पुनर्वासस्य च सर्वाधिकां जटिलां प्रक्रियां पूर्णां कृत्वा अधुना प्रशासनम् अन्तिमचरणस्य सज्जतां तीव्रतया करोति। शीघ्रमेव लोकनिर्माणविभागः ड्रोन-माध्यमेन भूमेः मापनं कृत्वा सीमावेष्टनस्य (तारवेष्टनस्य) कार्यं प्रारप्स्यते, येन मुख्यनिर्माणकार्याणां मार्गः पूर्णतया प्रशस्तो भविष्यति। प्रशासनं सम्बन्धिताः च सर्वकारीयाः संस्थाः अधुना कर्गदीयकार्यविधिम् अतिक्रम्य पूर्णतया कार्यान्वयनस्य स्थितौ आगताः सन्ति। परियोजनायाः अग्रिमस्य महत्त्वपूर्णस्य च सोपानस्य अन्तर्गतं लोकनिर्माणविभागेन प्रस्तावितक्षेत्रस्य अत्याधुनिक-ड्रोन-प्रौद्योगिक्या सर्वेक्षणं करिष्यते।

अस्य सर्वेक्षणस्य मुख्योद्देश्यम् अधिगृहीतभूमेः वास्तविकभौगोलिकस्थितेः अवगमनं तस्याः सटीकसीमायाः निर्धारणं च अस्ति। ड्रोन-मानचित्रणस्य प्रतिवेदनं प्राप्तमात्रे एव विमानपत्तनविस्ताराय अधिगृहीतभूमौ सीमाङ्कनं कृत्वा सीमावेष्टनस्य कार्यं प्रारभ्यते। अनेन पदक्षेपेण न केवलम् अधिगृहीता भूमिः पूर्णतया सुरक्षितां भविष्यति, अपितु निर्माणकार्यस्य प्रारम्भाय स्पष्टं क्षेत्रमपि प्राप्तुं शक्यते। विमानपत्तनाय प्रस्तावितभूमेः स्थितिः सामान्यजनानाम् अपि स्पष्टा भविष्यति।

### सुलभतराः उत्तमतराश्च विमानसेवाः

काङ्गडा-विमानपत्तनस्य अयं बहुप्रतीक्षितः विस्तारः सम्पूर्णस्य प्रदेशस्य कृते परिवर्तनकारी सिद्धः भविष्यति। विस्तारीकरणानन्तरम् अत्र बृहद्विमानानां सञ्चालनं सुगमतया भवितुं शक्यते, येन विमानयात्रिभ्यः प्रत्यक्षः लाभः भविष्यति तथा तेभ्यः सुलभतराः उत्तमतराश्च विमानसेवाः उपलब्धाः भविष्यन्ति।

### उद्घाटिताः भविष्यन्ति जीविकायाः द्वाराणि

उत्तमविमानसम्पर्केन न केवलं स्थानीयपर्यटनव्यवसायाय नूतनं जीवनं प्राप्स्यते, अपितु क्षेत्रस्य आर्थिकविकासाय युवभ्यश्च जीविकायाः नवीनानि द्वाराणि अपि उद्घाटितानि भविष्यन्ति। विभागीयस्तरे अधुना सम्पूर्णां प्रक्रियां यथाशीघ्रं पूर्णत्वं नेतुं युद्धस्तरेन सज्जता प्रचलति।

## आगरा-नगरे राजाबलवन्तसिंह-महाविद्यालये, संस्कृतसप्ताहसमापनसमारोहः आजोजितः



**हिमसंस्कृतवार्ताः- प्रवेशकुमारशुक्लः, उत्तरप्रदेश)**

राजाबलवन्तसिंह-महाविद्यालये, आगरा इत्यत्र २१ अगस्ततः २७ अगस्त २०२६ पर्यन्तं संस्कृत-सप्ताहस्य आयोजनं विविधैः शैक्षणिकैः सांस्कृतिकैश्च कार्यक्रमैः सह हर्षोल्लासपूर्वकं सम्पन्नम्। संस्कृतसप्ताहस्य समापनसमारोहः अगस्तमासस्य २७ दिनाङ्के महाविद्यालयस्य छात्रकल्याणभवने उत्साहपूर्णवातावरणे आयोजितः। कार्यक्रमस्य शुभारम्भः स्वस्तिवाचनमन्त्रेण अभवत्, यत् श्रीरामशर्मणा सुसम्पन्नम्। ततः शालू-अञ्जल्योः मधुरस्वरेण सरस्वतीवन्दना प्रस्तुताभवत्। अनन्तरम् अम्बिकाचौधरी-महोदयया सुमधुरं संस्कृतगीतं प्रस्तुतम्। तस्याः मनोहरया गीतिप्रस्तुत्या सम्पूर्णं वातावरणं संस्कृतमयम् अभवत्। अतिथीनां स्वागतं परिचयं च संस्कृतविभागस्य प्राध्यापकः डॉ॰ कुमारपालमहोदयः अकरोत्।

कार्यक्रमे प्रतिमागुप्ता-महोदयया "संस्कृतसप्ताहः किमर्थं पाल्यते?" इति विषये सारगर्भितं वक्तव्यं प्रस्तुतम्। तया संस्कृतभाषायाः महत्त्वं, भारतीय-संस्कृतेः संरक्षणे संवर्धने च संस्कृतस्य योगदानं विशेषतः प्रतिपादितम्। कार्यक्रमस्य मुख्यातिथिरूपेण राजनीतिविभागस्य प्राध्यापकः सञ्जयमहोदयः उपस्थितः आसीत्। तेन "भोजनमन्त्रस्य महत्त्वं, संस्कृतं देवभाषारूपेण" इति विषये प्रभावपूर्णं सम्बोधनं कृतम्। तेन भोजनपूर्वं मन्त्रपठनस्य सांस्कृतिकं वैज्ञानिकं च महत्त्वं विवृतम्। संस्कृतभाषायाः गौरवं, प्राचीनत्वं तथा भारतीयजीवनपरम्परायां तस्याः विशिष्टं स्थानं च तेन प्रकाशयितम्। शिक्षाशास्त्री-विभागस्य बसन्तमहता-महोदयेन "रक्षाबन्धनपर्व किमर्थम् आचर्यते?" इति विषये सम्बोधनं कृतम्। तेन रक्षाबन्धनपर्वणः भारतीयपरम्परायां सामाजिकं सांस्कृतिकं च महत्त्वं विशदतया व्याख्यातम्। कार्यक्रमे महाविद्यालयस्य प्राध्यापकाः सन्तबहादुरमहोदयः, आनन्दमहोदयः, तरुणकुमारपाठकमहोदयः, डॉ. त्रिपाठी, मनुपालशास्त्रीमहोदयः अपि उपस्थिताः आसन्। तैः संस्कृतभाषायाः अध्ययनस्य, भारतीय- ज्ञान-परम्परायाः संरक्षणस्य, संस्कृतसंस्कृतेः संवर्धनस्य महत्त्वं प्रतिपादितम्।

कार्यक्रमस्य अध्यक्षतां महाविद्यालयस्य प्राचार्यः प्रो. विजयश्रीवास्तवः अकरोत्। अध्यक्षीयभाषणे तेन संस्कृतदिवसस्य महत्त्वं, संस्कृतभाषायाः उपयोगिता इति विषये विशिष्टं वक्तव्यं प्रदत्तम्। तेन संस्कृतस्य विविधज्ञानक्षेत्रेषु योगदानं प्रकाशयन् सप्तचक्राणि, योगशास्त्रं, राजकर्तव्यं, चिकित्साशास्त्रे संस्कृतस्य प्रभावः इत्यादीनां विषयाणां उल्लेखः कृतः। संस्कृतभाषा केवलं प्राचीनभाषा न, अपि तु ज्ञान-विज्ञानस्य समृद्धा भाषा अस्ति इति सन्देशः अपि तेन प्रदत्तः। तेन विद्यार्थिभ्यः संस्कृताध्ययनाय विशेषरूपेण प्रेरणा प्रदत्ता।

संस्कृतसप्ताहस्य अन्तर्गतं श्लोकपाठः, भगवद्गीतावाचनम्, संस्कृतगीतिप्रस्तुतिः, संस्कृत-सुभाषितपाठः, संस्कृतप्रतियोगिताः इत्यादयः विविधाः कार्यक्रमाः आयोजिताः। एतेषां कार्यक्रमाणां माध्यमेन छात्रेषु संस्कृतभाषां प्रति रुचिः, अनुरागः, आत्मीयता वर्धिता। कार्यक्रमेषु शताधिकाः प्राध्यापकाः, शोधच्छात्राः, छात्राः, छात्राश्च संस्कृतानुरागिणः उत्साहपूर्वकं सहभागिनः अभवन्। कार्यक्रमस्य संयोजकः संस्कृत- विभागाध्यक्षः डॉ. छगनलालशर्मा-महोदयः आसीत्। कार्यक्रमस्य कुशलसञ्चालनं प्रतिज्ञा- महोदयया कृतम्। कार्यक्रमस्य अन्ते धन्यवादज्ञापनं संस्कृतविभागाध्यक्षः डॉ. छगनलालशर्मामहोदयेन कृतम्। तेन समारोहे उपस्थितेभ्यः सर्वेभ्यः अतिथिभ्यः, प्राध्यापकेभ्यः, शोधच्छात्रेभ्यः, छात्रेभ्यः, संस्कृतानुरागिभ्यः च हार्दिकं धन्यवादं ज्ञापितम्। अन्ते शान्तिमन्त्रेण कार्यक्रमस्य समापनम् अभवत्। समापनसमारोहे उपस्थितैः सर्वैः संस्कृतभाषायाः संरक्षणाय, संवर्धनाय तथा च प्रचाराय संकल्पः कृतः। सम्पूर्णः कार्यक्रमः संस्कृतभाषायाः गौरवं, भारतीयज्ञानपरम्परायाः महत्त्वं तथा च संस्कृतसंस्कृतेः समृद्धिं प्रकाशयन् अत्यन्तम् उत्साहपूर्णेन वातावरणेन सम्पन्नः।



## "एआइ प्रौद्योगिक्या प्रयोगः तिरुमलवनानाम् अन्वेषणार्थं तीर्थयात्रिकाणां सुरक्षायाः कृते भविष्यति

**रविः खरिडेहालः – बेङ्गलूरु**

टीटीडी संस्थया अन्वेषणयोजना सङ्कल्पिता । तिरुमलवनानाम् वन्यपशवः पदमार्गे तीर्थयात्रायाः कृते संकटः भवन्ति ।तेन तीर्थयात्रिकाणां मध्ये प्राणव्यायच्छन उत्पन्नः अस्ति ।अन्वेषणयन्त्रे प्रकाशीय-तापीय-प्रतिबिम्ब-क्षमता अस्ति।कठिनभूभागेषु उपयोगी भवति । न्यूनदृश्यतास्थितौ अपि कार्यं कर्तुं समर्थः।अस्य एआइ-यन्त्रस्य एतत् कार्यप्रदर्शनं टीटीडी-अधिकारिभिः समीक्षितम् ।पूर्वं ज्ञातुं चेतयितुं च शक्नोति । यत् सुरक्षाबलानाम् द्रुतनियोजनं सक्षमं करोति।वन्यजीवस्य आवागमनस्य प्रतिमानाः तीर्थयात्रिकाणां सुरक्षाबलानाञ्च वर्धितां सज्जतां सक्षमं कुर्वन्ति ।

# रक्षाबन्धनपर्वणः आध्यात्मिकसमीक्षा
## (पर्वविशेषः)



- डॉ. विमलेश झा,

भारतीयसंस्कृतौ पर्वणां परम्परा केवलं मनोरञ्जनाय, सामाजिकसमागमाय वा न प्रवर्तते, अपितु प्रत्येकं पर्वणः पृष्ठभूमौ गम्भीरः आध्यात्मिकः, सांस्कृतिकः, नैतिकश्च सन्देशः निहितः अस्ति। भारतीयाः पर्वाणि जीवनस्य विविधमूल्यानां स्मारकानि सन्ति। तेषु रक्षाबन्धनपर्व सर्वाधिकं पवित्रं, भावपूर्णं, पारिवारिकसम्बन्धान् सुदृढीकर्तुं समर्थं च पर्व अस्ति। श्रावणमासस्य पूर्णिमायां प्रचलितमिदं पर्व सामान्यतः भ्रातृभगिन्योः स्नेहस्य, विश्वासस्य, परस्पररक्षणस्य च प्रतीकरूपेण स्वीक्रियते। भगिनी भ्रातुः हस्ते रक्षासूत्रं बध्नाति, भ्राता च तस्याः रक्षणस्य संकल्पं करोति।

किन्तु रक्षाबन्धनस्य आध्यात्मिकं स्वरूपं केवलं भ्रातृभगिन्योः सम्बन्धपर्यन्तं सीमितं नास्ति। 'रक्षा' इति शब्दः अस्माकं सम्पूर्णजीवनस्य संरक्षणस्य बोधकः, 'बन्धनम्' इति शब्दः प्रेम्णा, कर्तव्येन, धर्मेण च परस्परसम्बन्धस्य सूचकः विद्यते। अतः रक्षाबन्धनं वस्तुतः प्रेम्णः धर्मेण सह, कर्तव्यस्य भावनया सह, व्यक्तेः समाजेन सह, जीवस्य प्रकृत्या सह, मानवस्य परमात्मना सह सम्बन्धस्य स्मारकं भवितुमर्हति।

'रक्षाबन्धनम्' इति पदं 'रक्षा' तथा 'बन्धनम्' इति द्वाभ्यां पदाभ्यां निर्मितम् अस्ति। 'रक्षा' नाम संरक्षणम्, परित्राणम्, हितसाधनम् च। 'बन्धनम्' नाम सम्बन्धस्थापनम् अथवा दृढीकरणम्। अतः रक्षाबन्धनस्य मूलभावः अस्ति- प्रेमपूर्वकं परस्परस्य रक्षणाय संकल्पः।

अस्मिन् पर्वणि रक्षासूत्रस्य विशेषं महत्त्वम् अस्ति। सूत्रं सूक्ष्मं भवति, किन्तु तस्मिन् निहितः भावः अत्यन्तं विशालो वर्तते। सूत्रस्य प्रत्येकं तन्तुः प्रेम, विश्वास, कर्तव्य, आत्मीयता, संयम, सद्भावना, उत्तरदायित्वं च सूचयितुं शक्नोति। यथा अनेके तन्तवः सम्मिल्य दृढं सूत्रं निर्मान्ति, तथैव प्रेम, विश्वासः, त्यागः, सेवा, सहानुभूतिः च सम्मिलिताः भूत्वा दृढं पारिवारिकं सामाजिकं च जीवनं निर्मान्ति। रक्षाबन्धनं श्रावणमासस्य पूर्णिमायां भवति। श्रावणमासः भारतीयपरम्परायां भक्तेः, तपसः, पवित्रतायाः, शिवोपासनायाश्च मासरूपेण प्रसिद्धः वर्तते। वर्षाकाले प्रकृतिः हरितवर्णेन सुशोभिता भवति। भूमिः जीवनदायिनी भवति, नद्यो जलपूर्णाः भवन्ति, वृक्षाः नवीनजीवनं प्राप्नुवन्ति। एषः कालः अन्तर्बाह्यशुद्धेः प्रेरणां ददाति। पूर्णिमा पूर्णत्वस्य सूचिका अस्ति। चन्द्रस्य पूर्णरूपं मनसः शान्तेः, प्रकाशस्य, प्रसन्नतायाश्च प्रतीकं मन्यते। अतः श्रावणपूर्णिमायां रक्षासूत्रबन्धनस्य भावः केवलं बाह्यसमारोहः न, अपि तु स्वजीवनं प्रेम्णा, सदाचारैः, धर्मेण, आत्मसंयमेन च पूर्णं कर्तुम् इत्यस्य प्रेरणापि अस्ति। रक्षासूत्रं सामान्यतया हस्ते बध्यते। बाह्यदृष्ट्या तत् अल्पमूल्यं सूत्रमात्रं दृश्यते, परन्तु भारतीयदृष्ट्या तस्य महत्त्वं भावनायां निहितम् अस्ति। सूत्रं बध्नन् मनुष्यः एकं पवित्रं व्रतं स्वीकरोति- 'अहं त्वां रक्षिष्यामि, तव हितं चिन्तयिष्यामि, त्वया सह सत्यनिष्ठया व्यवहारं करिष्यामि।' वास्तविकरक्षा केवलं शरीरस्य रक्षा न भवति। धनस्य, पदस्य, सम्पत्तेः वा संरक्षणमात्रं रक्षा नास्ति। मनुष्यस्य सद्बुद्धेः रक्षा, संस्काराणां रक्षा, चरित्रस्य रक्षा, सत्यस्य रक्षा, धर्मस्य रक्षा, प्रकृतेः रक्षा, समाजस्य शान्तेः रक्षा च वास्तविकरक्षायाः अङ्गानि सन्ति।

यदि भ्राता भगिनीं केवलं बाह्यसंकटात् रक्षितुं प्रतिज्ञां करोति, किन्तु तस्याः सम्मानस्य, स्वातन्त्र्यस्य, शिक्षायाः, स्वाभिमानस्य च रक्षणं न करोति, तर्हि तस्य प्रतिज्ञा अपूर्णा भवति। तथैव भगिन्यः अपि भ्रातुः जीवनमूल्यानां, सदाचारस्य, आत्मविश्वासस्य च संरक्षणे सहयोगं कुर्वन्ति। अतः रक्षाबन्धनं द्विपक्षीयं उत्तरदायित्वं शिक्षयति।

रक्षाबन्धनस्य मूलाधारः प्रेम अस्ति। प्रेम केवलं भावुकता नास्ति। यत्र त्यागः, सेवा, विश्वासः, क्षमा, सहानुभूतिः, सम्मानः च सन्ति, तदेव वास्तविकं प्रेम उच्यते। भारतीयदर्शने प्रेम आत्मीयतायाः विस्तारः अस्ति। भगिनी भ्रातुः हस्ते रक्षासूत्रं बध्नाति। तस्याः मनसि भ्रातुः कल्याणस्य भावना भवति। भ्राता भगिन्याः सुखसमृद्ध्योः रक्षणस्य संकल्पं करोति। अस्मिन् विनिमये धनस्य अपेक्षा नास्ति; मुख्यं तत्त्वं निःस्वार्थभावः अस्ति। निःस्वार्थप्रेम एव आध्यात्मिकप्रेम्णः आधारः अस्ति।

उपनिषदां दृष्ट्या समस्तं जगत् एकात्मभावेन सम्बद्धम् अस्ति। अतः रक्षाबन्धनस्य प्रेमभावना परिवारात् समाजं प्रति, समाजात् राष्ट्रं प्रति, राष्ट्रात् विश्वं प्रति च विस्तरितुं शक्नोति।

भारतीयसंस्कृतेः मूलमन्त्रेषु 'धर्मस्य रक्षणम्' प्रमुखम् अस्ति। धर्मः केवलं धार्मिकाचारः नास्ति। सत्यं, अहिंसा, दया, न्यायः, संयमः, सेवा, परोपकारः, कर्तव्यपालनं च धर्मस्य व्यापकस्वरूपम् अस्ति। प्राचीनोक्तिः अस्ति- "धर्मो रक्षति रक्षितः।" अर्थात् यः धर्मस्य रक्षणं करोति, धर्मः अपि तस्य रक्षणं करोति। रक्षाबन्धनस्य आध्यात्मिकसन्देशः अस्मिन् सिद्धान्ते दृढतया सम्बद्धः अस्ति। यदि मनुष्यः सत्यं रक्षति, सत्यं तस्य जीवनं रक्षति। यदि सः सदाचारं रक्षति, सदाचारः तस्य प्रतिष्ठां रक्षति। यदि सः परिवारस्य स्नेहं रक्षति, परिवारः अपि च संकटसमये तस्य आश्रयो भवति।

अतः अस्मिन् पर्वणि केवलं व्यक्तेः रक्षणस्य प्रतिज्ञा न भवेत्, अपितु धर्मस्य, संस्कृतेः, सत्यस्य, सदाचारस्य च रक्षणस्य संकल्पः अपि भवेत्।

रक्षाबन्धनस्य सामाजिकसन्देशेषु स्त्रीसम्मानस्य महत्त्वपूर्णं स्थानम् अस्ति। भगिनी केवलं रक्षणीयव्यक्तिः नास्ति; सा परिवारस्य, समाजस्य, राष्ट्रस्य च सक्रियनिर्मात्री अस्ति। तस्याः शिक्षा, स्वाभिमानः, निर्णयस्वातन्त्र्यं, प्रतिभा, गरिमा च संरक्षितुं समाजस्य सामूहिकदायित्वम् अस्ति। भारतीयसंस्कृतौ नारीं प्रति उच्चः भावः दृश्यते- "यत्र नार्यस्तु पूज्यन्ते रमन्ते तत्र देवताः।"

अस्य भावस्य वास्तविकः अर्थः नारीं केवलं पूजयितुं न, अपि तु तस्याः सम्मानं, अधिकारं, सुरक्षां च सुनिश्चितं कर्तुम् अस्ति। रक्षाबन्धनं समाजं स्मारयति यत् नारीसम्मानः केवलं एकदिवसीयः भावः न भवेत्, अपितु दैनिकजीवनस्य संस्कारः भवेत्।

आधुनिकजीवने परिवारव्यवस्था विविधपरिवर्तनैः प्रभाविताऽस्ति। व्यस्तजीवनम्, भौतिकवादः, व्यक्तिगतस्पर्धा, डिजिटलमाध्यमानां अतिप्रयोगः च पारिवारिकसम्बन्धान् कदाचित् दुर्बलान् कुर्वन्ति। एतादृशे समये रक्षाबन्धनम् आत्मीयतायाः पुनर्स्मरणस्य अवसरं प्रददाति।

भ्रातरः भगिन्यश्च परस्परं मिलन्ति, बाल्यकालस्य स्मृतीः स्मरन्ति, सुखदुःखयोः अनुभवाः साझां कुर्वन्ति। परिवारस्य वृद्धाः अपि आशीर्वादं ददति। एवं पर्वणः माध्यमेन पारिवारिकसम्बन्धाः पुनः सजीवाः भवन्ति। आध्यात्मिकदृष्ट्या कुटुम्बं प्रथमं विद्यालयम् अस्ति। बालकः प्रेमं, त्यागं, अनुशासनं, सेवा, सम्मानं, क्षमा च प्रथमं परिवारादेव शिक्षते। अतः रक्षाबन्धनं पारिवारिकसंस्काराणां पुनरुज्जीवनस्य अवसरः भवति।

रक्षाबन्धनस्य व्यापकभावना गुरुशिष्यसम्बन्धेऽपि द्रष्टुं शक्यते। गुरु शिष्यस्य अज्ञानात् ज्ञानं प्रति मार्गदर्शनं करोति। सः शिष्यस्य चरित्रनिर्माणं, विवेकविकासं, नैतिकमूल्यानां संवर्धनं च करोति। शिष्यः गुरोः प्रति श्रद्धां, कृतज्ञतां, अनुशासनं च धारयति। अतः रक्षाबन्धनस्य पवित्रभावना केवलं रक्तसम्बन्धेषु सीमिता नास्ति। यः कश्चित् अस्माकं जीवनं सत्यस्य, ज्ञानस्य, सदाचारस्य च मार्गे नयति, तेन सह आध्यात्मिकः सम्बन्धः भवितुमर्हति। अद्य पर्यावरणसंरक्षणं विश्वस्य प्रमुखेषु विषयेषु अन्यतमम् अस्ति। वयं रक्षाबन्धनस्य 'रक्षा' भावनां यदि व्यापकतया स्वीकुर्मः, तर्हि प्रकृतेः रक्षणमपि अस्य पर्वणः आवश्यकः सन्देशः भवितुमर्हति। वृक्षाः अस्मभ्यं प्राणवायुम्, फलानि, पुष्पाणि, छायां, औषधयः च ददति। नद्यः जलं ददति। पृथिवी अस्मान् धारयति। सूर्यः प्रकाशं ददाति। वायुः जीवनस्य आधारः अस्ति। अतः प्रकृतिः अस्माकं जीवनस्य रक्षिका अस्ति। तस्याः रक्षणं प्रत्युपकाररूपेण अस्माकं कर्तव्यम् अस्ति। रक्षाबन्धनस्य दिने वृक्षेषु रक्षासूत्रं बद्ध्वा तेषां संरक्षणस्य संकल्पः, जलसंरक्षणस्य प्रतिज्ञा, प्लास्टिक इत्यस्य न्यूनोपयोगः, स्वच्छतायाः पालनं च अस्य पर्वणः आध्यात्मिकतां वर्धयितुं शक्नोति।

रक्षाबन्धनं समाजे बन्धुत्वस्य भावनां जनयति। जाति, वर्ग, भाषा, प्रदेश, आर्थिकस्थितिः इत्यादीनां भेदान् अतिक्रम्य मानवाः परस्परं बन्धुभावेन पश्येयुः। अयमेव अस्य पर्वणः व्यापकः सन्देशः विद्यते।

यदि समाजे प्रत्येकं मनुष्यः अन्यस्य हिताय चिन्तयति, दुर्बलस्य साहाय्यं करोति, पीडितस्य रक्षणं करोति, वृद्धानां सम्मानं करोति, बालकानां संरक्षणं करोति, नारीणां गरिमां रक्षति च, तर्हि समाजः सुदृढः भवति। रक्षाबन्धनस्य वास्तविकं रूपं तदा प्रकटते यदा 'मम' इत्यस्य सीमां त्यक्त्वा 'अस्माकम्' इति भावः विकसितो भवति।

रक्षाबन्धनं राष्ट्रप्रेम्णः प्रेरणामपि ददाति। राष्ट्रस्य सैनिकाः, सुरक्षाकर्मिणः, चिकित्सकाः, अग्निशामकाः, आपत्कालीनसेवाकर्मिणः च जनजीवनस्य रक्षणे निरन्तरं संलग्नाः भवन्ति। तेषां सेवाभावः रक्षाबन्धनस्य व्यापकभावनायाः मूर्तरूपम् अस्ति। राष्ट्ररक्षा केवलं सीमासुरक्षया न सम्पन्ना भवति। शिक्षायाः रक्षा, संस्कृतेः रक्षा, पर्यावरणस्य रक्षा, संविधानस्य सम्मानं, सार्वजनिकसम्पत्तेः संरक्षणं, सामाजिकसद्भावस्य संवर्धनं च राष्ट्ररक्षायाः अङ्गानि सन्ति।

अतः प्रत्येकः नागरिकः स्वकर्तव्यं सम्यक् पालयन् राष्ट्रस्य रक्षणे योगदानं दातुं शक्नोति।

रक्षाबन्धनस्य सर्वाधिकं गम्भीरः पक्षः आत्मरक्षा अस्ति। मनुष्यः बाह्यशत्रुभ्यः रक्षणं कर्तुं प्रयतते, किन्तु अन्तःस्थिताः कामः, क्रोधः, लोभः, मोहः, मदः, मात्सर्यम् इत्येते षड्- रिपवः तस्य जीवनस्य वास्तविकाः शत्रवः सन्ति।भगवद्गीतायां भगवान् श्रीकृष्णः आत्मोन्नतेः महत्त्वं प्रतिपादयन् कथयति- "उद्धरेदात्मनात्मानं नात्मानमवसादयेत्।"

मनुष्यः स्वयमेव स्वस्य उद्धारं कर्तुं शक्नोति। अतः रक्षाबन्धनस्य अवसरः आत्मसंयमस्य व्रतस्यापि अवसरः भवेत्। अस्मिन् दिने मनुष्यः संकल्पं कुर्यात्- अहं क्रोधं नियन्त्रयिष्यामि, असत्यं न वदिष्यामि, परपीडायां संलग्नो न भविष्यामि, दुर्व्यसनानि

# मालदा जनपदे गौडचन्द्रघोष- उच्चविद्यालये संस्कृतदिवसोत्यापणम्





**हिमसंस्कृतवार्ताः- तन्मयपाण्डेयः**

मालदास्थिते गौडचन्द्रघोष- उच्चविद्यालये २७ अगस्त २०२६ दिनाङ्के संस्कृतदिवसानुष्ठानस्य प्रथमदिवसः श्रद्धया, उत्साहेन च विविधैः कार्यक्रमैः सह सम्पन्नः। अयं संस्कृतसप्ताहसमारोहः २५ अगस्त् तः ३१ अगस्त् २०२६ पर्यन्तम् आयोजितः अस्ति पश्चिमबङ्गराज्ये। अनुष्ठानस्यारम्भे द्वीपप्रज्वलनेन तथा अतिथिनां वरणेन च आयोजितौ। अस्मिन् कार्यक्रमे प्रधानातिथिः रूपेण वानी-भवनटाउनग्रन्थागारस्य ग्रन्थागारिकः सुवीरकुमारसाहा उपस्थितः आसीत्। मुख्यातिथिरूपेण आसीत् गौड-महाविद्यालयस्य संस्कृत-विभागस्याध्यापकः डॉ. विजयघोषः, विशेषातिथिरूपेण आसन् साहापुर-उच्चविद्यालयस्य विज्ञानविभागस्य-शिक्षकः पिन्टुसानीलः, साहापुर- उच्च विद्यालयस्य इतिहास-विभागस्यशिक्षकः प्रणवमण्डलः, विशेषरूपेण आसन् संस्कृतभारती कार्यकर्ता, कैकाला- संस्कृत-महाविद्यालयस्य अध्यापकः डॉ. निशिकान्तपाण्डेयः, संस्कृतभारती- कार्यकर्ता शानुलालश्च। उच्चविद्यालयस्य सर्वे छात्राः आचार्याश्च श्रद्धापूर्वकं कार्यक्रमेषु उपस्थिताः आसन्। उच्चविद्यालयस्य दायित्वप्राप्ता प्रधानाचार्या अनामिका मण्डलः संस्कृतभाषायाः प्रचारप्रसाराय भव्यायाः संस्कृत-अनुष्ठानस्य आयोजनं कृतम्। उच्चविद्यालयतः सर्वे आचार्याः बहवः आनन्दैः प्रवृत्ता। छात्रैः, आचार्यैः, अन्यैः सहभागिभिश्च उत्साहपूर्वकं संस्कृतदिवसे सहभागिता कृता। तदुत्तरम् उच्चविद्यालये सर्वेभ्यः प्रसादः अपि प्रदत्तः। छात्रैः विविधाः सांस्कृतिकाः कार्यक्रमाः प्रस्तुताः। संस्कृतगीतैः, श्लोकपाठेन, नाट्यप्रस्तुतिभिः, अन्याभिः सांस्कृतिकाभिः प्रस्तुतिभिः कार्यक्रमः आकर्षकः अभवत्। उच्चविद्यालयस्य प्राचार्या अनामिका मण्डलः विशिष्टभूमिकां निर्वहन् उपस्थितः आसीत्। कार्यक्रम- समन्वयकरूपेण प्रधानाचार्या निशिकान्त-पाण्डेयस्य सहभागिरूपेण उपस्थितः आसीत्। सर्वे आचार्याः छात्राः कार्यक्रमेऽस्मिन् उपस्थाय शोभां वर्धितवन्तः। कार्यक्रमे संस्कृतभाषायाः प्रचारप्रसारस्य, छात्रेषु संस्कृताध्ययनस्य रुचेः संवर्धनस्य तथा भारतीयज्ञानपरम्परायाः संरक्षणस्य महत्त्वं प्रतिपादितम्। अस्मिन् कार्यक्रमे भागं गृहीतवत्यः प्रायः ७५ छात्राः। अनुष्ठानस्य समापनमभवत् शान्तिमन्त्रेन जयघोषोल्लासेन च।

# बाहिरखण्ड- वैदिक- संस्कृत- विद्यापीठे संस्कृत- सप्ताह- महोत्सवः हर्षोल्लासेन समाचरितः




**हिमसंस्कृतवार्ताः- डॉ. निशिकान्तपाण्डेयः**

संस्कृतसप्ताहमहोत्सवस्य चतुर्थदिने पश्चिमबङ्गप्रदेशस्य हुगलीमण्डले स्थिते वैदिक-संस्कृत- विद्यापीठे, बाहिरखण्डे श्रावणपूर्णिमोत्सवः श्रद्धया हर्षोल्लासेन च समाचरितः।

कार्यक्रमे श्रीसीताराम- वैदिकादर्श- संस्कृत-महाविद्यालयस्य प्राचार्यः डॉ. सोमेशकुमारमिश्रः तथा अन्ये आचार्याः उपस्थिताः आसन्। तत्रत्यैः आचार्यैः, विद्यार्थिभिः तथा उपस्थितैः भक्तजनैः सह श्रावणपूर्णिमायाः पावनं पर्व श्रद्धापूर्वकं समाचरितम्। कार्यक्रमस्य प्रमुखाकर्षणं तत्रत्यस्य महास्वामिनः संस्कृतेन प्रदत्तम् आशीर्वचनम् आसीत्। महास्वामिना संस्कृतभाषया एव रक्षाबन्धनस्य महत्त्वं प्रतिपादितम्। रक्षाबन्धनं केवलं पारिवारिकस्नेहस्य प्रतीकं न, अपितु भारतीयसंस्कृतेः, परस्परविश्वासस्य, स्नेहस्य च पवित्र प्रतीकम् इति तेन प्रतिपादितम्। विशेषतः पश्चिमबङ्गप्रदेशे संस्कृतभाषायाः संरक्षणस्य, संवर्धनस्य, प्रचारप्रसारस्य आवश्यकता अपि तेन प्रभावपूर्णतया प्रतिपादिता।

तदनन्तरं महाविद्यालयस्य प्राचार्यः डॉ. सोमेशकुमारमिश्रः संस्कृतभाषायाः महत्त्वं, तस्याः प्राचीनता, वैज्ञानिकता, भारतीयज्ञानपरम्परायां च तस्याः विशिष्टं स्थानं वर्णितवान्। संस्कृतस्य संरक्षणं केवलं भाषायाः संरक्षणं न, अपितु भारतस्य समृद्धस्य ज्ञानवाङ्मयस्य सांस्कृतिक- परम्परायाश्च संरक्षणम् इति सः अवदत्। कार्यक्रमस्य समग्रसमन्वयं डॉ. शान्तनुकुमार चक्रवर्तिवर्यः कुशलतया कृतवान्। तस्य समन्वयेन कार्यक्रमः सुव्यवस्थितरूपेण सफलतया च सम्पन्नः। अन्ते उपस्थितैः सर्वैः संस्कृतभाषायाः संरक्षणाय, संवर्धनाय, प्रचारप्रसाराय च सामूहिकरूपेण प्रयत्नः करणीयः इति संकल्पः कृतः। एवं संस्कृत-सप्ताह-महोत्सवस्य चतुर्थदिवसः श्रावणपूर्णिमायाः पावनतया, संस्कृतभाषायाः गौरवेण च परिपूर्णः सन् सफलतया सम्पन्नः।

त्यक्ष्यामि, सदाचारं स्वीकरिष्यामि, आत्मविकासाय प्रयतिष्ये। एवं बाह्यरक्षासूत्रं अन्तःकरणस्य आत्मरक्षासूत्रं भवितुमर्हति।

आधुनिकयुगः विज्ञानस्य, प्रौद्योगिक्याः, सञ्चारस्य च युगः अस्ति। मनुष्यः विश्वस्य एकस्मात् क्षेत्रात् अपरक्षेत्रेण सह क्षणमात्रेण सम्पर्कं कर्तुं शक्नोति। तथापि मानसिकदूरत्वं, सामाजिकसंघर्षः, एकाकित्वम्, पारिवारिकविच्छेदः च वर्धमानाः दृश्यन्ते। एतादृशे विकराले समये रक्षाबन्धनस्य सन्देशः अधिकः प्रासंगिकः अस्ति। विज्ञानं जीवनस्य साधनानि दातुं शक्नोति, किन्तु स्नेहं, करुणां, विश्वासं, आत्मीयतां च मनुष्य एव विकसितुं शक्नोति। अतः आधुनिकप्रगतिः मानवीयमूल्यैः सह योजनीया। अस्मिन् यान्त्रिकयुगे रक्षाबन्धनं केवलं सामाजिकमाध्यमेषु सन्देशप्रेषणस्य पर्व न भवेत्। यदि सम्भवेत् तर्हि परिवारजनैः सह प्रत्यक्षसमागमः, वृद्धानां दर्शनम्, निर्धनानां साहाय्यम्, वृक्षारोपणम्, सेवाकार्यं, संस्कारशिक्षा च पर्वणः अङ्गानि स्वीकर्तव्यानि। भारतीयपरम्परायां पर्वणि दानस्य विशेषं महत्त्वम् अस्ति। दानं केवलं धनप्रदानं नास्ति। अन्नदानम्, विद्यादानम्, औषधदानम्, समयदानम्, श्रमदानम्, ज्ञानदानम्, रक्तदानम् इत्यादयः अपि सेवायाः स्वरूपाणि सन्ति।

रक्षाबन्धनस्य दिने यदि कश्चित् निर्धनबालकाय शिक्षोपकरणं ददाति, वृद्धस्य सेवां करोति, रोगिणः साहाय्यं करोति, वृक्षं रोपयति अथवा समाजोपयोगी कार्यं करोति, तर्हि सः रक्षाबन्धनस्य आध्यात्मिकभावनां व्यवहाररूपेण परिवर्तयति।

रक्षाबन्धनदिने सामान्यतः भ्राता भगिनीं प्रति रक्षणस्य वचनं ददाति। किन्तु तस्य संकल्पस्य व्यापकस्वरूपं भवितव्यम्- "अहं तव सम्मानं रक्षिष्यामि। तव सुखदुःखयोः सहायकः भविष्यामि। आपत्काले तव साहाय्यं करिष्यामि।

सत्यस्य धर्मस्य च मार्गे स्थास्यामि।परिवारस्य गौरवं रक्षिष्यामि। प्रकृतेः संरक्षणं करिष्यामि। समाजस्य सद्भावं वर्धयिष्यामि।स्वस्य दुर्गुणान् जित्वा सद्गुणान् संवर्धयिष्यामि।" एषः संकल्पः रक्षाबन्धनस्य बाह्याचारम् आन्तरिकसाधनायाः रूपे परिणमयति।

रक्षाबन्धनपर्व भारतीयसंस्कृतेः प्रेम, विश्वास, कर्तव्य, सेवा, त्यागः, सम्मानं, धर्म- संरक्षणस्य च अद्भुतं समन्वितरूपम् अस्ति। रक्षासूत्रं अस्मान् स्मारयति यत् जीवनं केवलं अधिकारैः न, अपि तु कर्तव्यैः अपि निर्मीयते। यः रक्षणं इच्छति, सः प्रथमं अन्येषां रक्षणं कर्तुं शिक्षेत्। यः सम्मानं इच्छति, सः प्रथमम् अन्येषां सम्मानं कुर्यात्। यः स्नेहम् इच्छति, सः प्रथमं निःस्वार्थस्नेहं दद्यात्।

रक्षाबन्धनस्य वास्तविकम् आध्यात्मिकस्वरूपं तदा साकारं भवति, यदा हस्तस्थितं सूत्रं हृदयस्थेन संकल्पेन सम्बद्धो भवति। सूत्रं तु कतिपयेषु दिनेषु जीर्णं भवितुम् अर्हति, किन्तु तेन सह कृतः प्रेम्णः, कर्तव्यस्य, धर्मस्य च संकल्पः जीवनपर्यन्तं स्थिरः भवेत्। अतः रक्षाबन्धनं केवलं भगिन्या भ्रातुः हस्ते सूत्रबन्धनस्य उत्सवः नास्ति; अपि तु आत्मनः आत्मना सह, परिवारस्य परिवारेण सह, समाजस्य समाजेन सह, मानवस्य प्रकृत्या सह, जीवस्य परमात्मना सह च पवित्रसम्बन्धस्य पुनर्स्मरणम् अस्ति। अन्ते च-

**येन बद्धो बलि राजा, दानवेन्द्रो महाबलः।**
**तेन त्वामभिबध्नामि, रक्षे मा चल मा चल॥**

सर्वेभ्यः भ्रातृभ्यः सर्वाभ्यः भगिनीभ्यः च रक्षाबंधनपर्वणः हार्दिक्यः शुभकामनाः।।इत्यलम्।

- डॉ. विमलेश झा,
डीएवी पब्लिक स्कूल,
बरारी भागलपुर,बिहार

# शोधे मौलिकतायै शास्त्रचिन्तनम् आवश्यकम् – डॉ. दिनेशरसालः



## कविकुलगुरु-कालिदास-संस्कृत-विश्वविद्यालयस्य संस्कृत-महोत्सवस्य उद्घाटनम्

**हिमसंस्कृतवार्ताः - डॉ रेणुका बोकारे नागपुरम्।**

कविकुलगुरु-कालिदास-संस्कृत-विश्वविद्यालये विश्वसंस्कृतदिवसस्य अवसरे संस्कृतमहोत्सवस्य उद्घाटनं सम्पन्नम्। विश्वविद्यालयस्य विस्तारसेवामण्डलस्य पक्षतः रामटेकनगरे विश्वसंस्कृतदिवसस्य आयोजनं कृतम्। विश्वविद्यालयस्य रामटेक, वारङ्गा तथा रत्नागिरी-शैक्षणिकपरिसरेषु प्रतिवर्षं संस्कृतमहोत्सवस्य अवसरे विभिन्नाः अनन्याः, पारम्परिकाः सृजनात्मकाश्च उपक्रमाः आयोज्यन्ते। माननीय-कुलगुरोः डॉ. प्रशान्त-बोकारे-महोदयस्य प्रेरणया अस्य महोत्सवस्य आयोजनं कृतम्। कार्यक्रमस्य अध्यक्षतां संस्कृत-संस्कृतेतर-संकायस्य अधिष्ठाता प्रो. कविता होले इत्येषा अकरोत्। प्रमुखातिथिरूपेण पुणे-विश्वविद्यालयस्य संस्कृत-प्राकृत-विभागाध्यक्षः डॉ. दिनेश रसालः उपस्थितः आसीत्। मञ्चे मानद-अधिष्ठाता प्रो. कलापिनी अगस्ती, प्रो. हरेकृष्ण अगस्ती, रामटेक-परिसरस्य सञ्चालकः प्रो. प्रसाद गोखले, कुलसचिवः डॉ. रोशन अलोने तथा विस्तारसेवा-सञ्चालकः प्रो. पराग जोशी उपस्थिताः आसन्। कार्यक्रमस्य शुभारम्भः सरस्वतीस्तवनेन मान्यवराणां शुभहस्तेन दीपप्रज्वलनेन च अभवत्। कार्यक्रमस्य प्रास्ताविकं विस्तारसेवा-सञ्चालकः प्रो. पराग जोशी अकरोत्। स्वस्य प्रास्ताविकवक्तव्ये तेन संस्कृतमहोत्सवस्य आयोजनसम्बन्धिनी विस्तृता सूचना प्रदत्ता। प्रमुखातिथिः डॉ. दिनेशरसालः स्वसम्बोधने अवदत्— "संस्कृतं भारतीयसंस्कृतिश्च अस्माकं प्रतिष्ठे स्तः। भारतस्य द्वे रूपे स्तः—भारतं संस्कृतं च। संस्कृतस्य अध्ययनं मूलसंस्कृतग्रन्थानां माध्यमेन करणीयम्, केवलम् अनुवादानां माध्यमेन न। अनुवादमाध्यमेन भाषायाः सौन्दर्यस्य, माधुर्यस्य, शब्दशक्तेः सामर्थ्यस्य च पूर्णः बोधः न भवितुं शक्नोति। अत एव अद्यतनस्य अधिकांशस्य शोधस्य मौलिकशोधत्वं न भवति, अपितु सः केवलं सूचनासङ्कलनपर्यन्तं सीमितः भवति। शोधे मौलिकतां, नवीनतां, नवोन्मेषं च आनेतुं शास्त्रचिन्तनम् आवश्यकम् अस्ति तथा मूलग्रन्थानाम् अध्ययनम् अनिवार्यम् अस्ति।" सः अग्रे अवदत् यत् संस्कृतभाषायाः प्रचारप्रसारः आवश्यकः अस्ति, किन्तु मूलग्रन्थानां संस्कृतशास्त्राणां च गहनाध्ययनेन बुद्धेः चिन्तनस्य च परिपक्वता भवति तथा च तेन अनुसन्धानस्य नूतनाः मार्गाः उद्घाट्यन्ते। कविकुलगुरु-कालिदास-संस्कृत-विश्वविद्यालयेन स्थापनाकालादेव संस्कृतस्य आधुनिकदृष्टिकोणेन सह संयोजनस्य कार्यं कृतम् अस्ति तथा विभिन्नानां आधुनिकपाठ्यक्रमाणां निर्माणं सञ्चालनं च क्रियते। शास्त्रदृष्टेः आधुनिकज्ञानस्य च समन्वयः भवति चेत् विद्यार्थिभ्यः अनुसन्धानस्य अधिकाः नवीनाः आयामाः उद्घाटिताः भविष्यन्ति।

### पारम्परिकज्ञानस्य आधुनिक-प्रौद्योगिक्या विज्ञानेन च पुनर्पाठः करणीयः – प्रो. कविता होले

अधिष्ठाता प्रो. कविता होले स्वस्य अध्यक्षीयभाषणे अवदत्— "यदि विकसितभारतस्य लक्ष्यं प्राप्तुम् इच्छामः तर्हि केवलम् आर्थिकप्रगतिः पर्याप्ता नास्ति; शिक्षायां आधुनिकज्ञानस्य, प्रौद्योगिक्याः विज्ञानस्य च समावेशः करणीयः। आधुनिकयुगे संस्कृतस्य प्रासङ्गिकता तथा आधुनिकप्रौद्योगिक्याः माध्यमेन संस्कृतस्य समाजस्य सर्वेषां वर्गाणां समीपं प्रभाविरूपेण प्रेषणस्य दिशि विशेषं कार्यं कर्तुं आवश्यकता अस्ति।" सा अवदत् यत् संस्कृतम् एका जीवन्ता भाषा अस्ति। पारम्परिकज्ञानस्य आधुनिकप्रौद्योगिक्या विज्ञानेन च पुनर्पाठः करणीयः। संस्कृतं वर्तमानस्यैव न, अपितु भविष्यस्यापि आधारभूता भाषा अस्ति। आधुनिकयुगे एआई-उपकरणानां माध्यमेन संस्कृतशास्त्राणि अधिकप्रभाविरूपेण रोचकरूपेण च पाठयितुं शक्यन्ते। पारम्परिकशास्त्राध्ययनस्य सह विद्यार्थिभिः एतासां नवीनप्रौद्योगिकीनां ज्ञानमपि प्राप्तव्यम्। संस्कृतं अधिकं व्यापकं सर्वतोमुखं च कर्तुं दिशि एतत् महत्त्वपूर्णं पदक्षेपम् अस्ति। "शास्त्रस्य सङ्गणक-प्रौद्योगिकिरूपस्य शस्त्रस्य च—उभयोः ज्ञानम् अद्यतनस्य आवश्यकता अस्ति। संस्कृतं केवलं संरक्षणपर्यन्तं सीमितं न कृत्वा संस्कृतस्य जनजनपर्यन्तं प्रेषणाय एआई-प्रौद्योगिकेः आत्मसात्करणं करणीयम्," इति प्रो. होले महोदया आह्वानम् अकरोत्। प्रो. कलापिनी अगस्ती-महोदयायाः संकल्पनया साकाररूपं प्राप्तवत्याः 'कः भवति बृहस्पतिः' इति प्रतियोगितायाः उद्घाटनं मान्यवराणां शुभहस्तेन कृतम्। विश्वविद्यालयस्य विभिन्नविभागानां पक्षतः अनेकाः प्रतियोगिताः आयोजिताः सन्ति। कार्यक्रमस्य सञ्चालनं प्रा. राधा देशकर इत्येषा अकरोत्, आभारप्रदर्शनं च प्रो. हरेकृष्ण अगस्ती अकरोत्।



## कुमारभास्करवर्मसंस्कृत-पुरातनाध्ययनविश्वविद्यालयस्य मुख्यसभागारे अद्य 'विदुषां सम्मानम्' इति भव्यः कार्यक्रमः सानन्दं सुसम्पन्नः

हिमसंस्कृतवार्ता डॉ. निशिकान्तपाण्डेयः नलबारी,

असमराज्यस्य नलबारीमण्डले स्थितस्य कुमारभास्करवर्मसंस्कृत-पुरातनाध्ययनविश्वविद्यालयस्यास्य प्राङ्गणे २५ अगस्त २०२६ दिनाङ्कतः ३१ अगस्त-२०२६ दिनाङ्कं यावत् आयोज्यमानस्य 'संस्कृतसप्ताहमहोत्सवस्य' अद्य मुख्यकार्यक्रमः आसीत्।
अस्य कार्यक्रमस्य मुख्यमुद्देश्यम् असमप्रान्तस्य तेषां वरिष्ठविदुषां सम्माननमसीत्, यैः सर्वदा स्वजीवनस्य बहुमूल्यं समयं संस्कृतभाषायाः निस्वार्थसेवायै समर्पितम्। कार्यक्रमस्य शुभारम्भः वैदिकमङ्गलाचरणेन अभवत्। तत्पश्चात् विश्वविद्यालयस्य छात्रैः मधुरसंस्कृतगीतेन सर्वेषां समागतानां विदुषां स्वागतं कृतम्। अस्मिन् कार्यक्रमे पञ्च प्रमुखविद्वान्सः आमन्त्रिताः आसन्— श्रीमान् वीरेन्द्रनाथमिश्रवर्यः, श्रीमान् रमणीकान्तशर्मावर्यः, डा.नकुलचन्द्रडेकावर्यः, श्रीमान् उमेशचन्द्रशर्मावर्यः, श्रीमान् उमेशशर्मावर्यश्च। एतेषु श्रीमान् वीरेन्द्रनाथमिश्रः, डा.नकुलचन्द्रडेका, श्रीमान् उमेशचन्द्रशर्मा च इति त्रयः विद्वांसः उपस्थिताः आसन् । द्वौ विद्वान्सौ केनचित् कारणेन आगन्तुं न शेकतुः । उपस्थितेभ्यः विद्वद्भ्यः प्रशस्तिपत्राणि, असमियासंस्कृतेः प्रतीकानि गामोछावस्त्रम्, पाटवस्त्रं (सेलेङ्), तथा 'जापी' इति प्रदाय तेषां भव्यं सम्माननं कृतम् । विश्वविद्यालयस्य कुलपतिः प्रोफेसर-प्रह्लाद रा जोशीवर्यः स्वकीयसारगर्भितभाषणेन विदुषां भूरिशः प्रशंसां कृतवान्, संस्कृतदिवसस्य पावनमहत्त्वं च स्पष्टीकृतवान्। तेनोक्तं यत् संस्कृतस्य संवर्धनाय सर्वत्र संस्कृतसप्ताहरिव कार्यक्रमो भवेत्। अनेन छात्रेषु संस्कृतं प्रति रुचिरपि वर्धिष्यते। ततः वेदाध्ययनविभागस्य सहायकाचार्यः डा.महेशचिदम्बरभट्टवर्यः विश्वविद्यालयस्य ध्येयमन्त्रस्य "सरस्वती श्रुतिमहतां महीयताम्" इत्यस्य अर्थसहितं स्पष्टं वाचनं कृतवान् । सम्मानितविद्वांसः संस्कृतसेवायाः स्वकीय-अनुभवान् प्रास्तौषन्, छात्रांश्च संस्कृतस्य संरक्षणाय, अध्ययनाय अनुसन्धानाय च सततं प्रेरयामासुः। समारोहस्यास्य मुख्यतत्त्वावधायिका सर्वदर्शनविभागस्य आचार्या प्रोफेसर-उमामहेश्वरी-बीवर्या आसीत्। कार्यक्रमस्य सञ्चालनं पुराण-इतिहासविभागस्य प्रभारी-अध्यक्षः श्रीमान् विवेक आचार्यवर्यः कृतवान्। अवसरेऽस्मिन् विश्वविद्यालयस्य सम-कुलपतिः आचार्या मल्लिका कलिता, परीक्षानियन्त्रकमहोदयः, कोषाध्यक्षमहोदयः, सर्वेषां विभागानामध्यक्षाः, अध्यापकाः, शोधछात्राः, सर्वे छात्राश्च उपस्थिताः आसन्। अयं गरिमामयः कार्यक्रमः अतीव साफल्येन प्रसन्नतापूर्वकं च सम्पन्नः अभवत्।

# संस्कृतदिवसविशेषः - पाणिनेः सूत्रेभ्यः ए.आई.-पर्यन्तं संस्कृतेः नूतनम् उड्डयनम्




**हिमसंस्कृतवार्ताः - आचार्यः मनोजशैलः।**

प्रधानमन्त्री श्रीनरेन्द्रमोदी-महोदयेन केन्द्रीयसंस्कृतविश्वविद्यालयस्य कृत्रिमबुद्धिमत्ता (Artificial Intelligence) तथा दत्तांशविज्ञान (Data Science) विषययोः बी.टेक.-कार्यक्रमस्य उल्लेखं करणानन्तरं संस्कृतशिक्षायाः परिवर्तमानं परिदृश्यं चर्चायां समागतम्। 28 जून 2026 दिनाङ्के प्रसारितस्य ‘मन की बात’ इति कार्यक्रमस्य 135-तमस्य संस्करणे प्रधानमन्त्री मोदी-महोदयेन अस्य कार्यक्रमस्य उल्लेखः कृतः। तेन उक्तं यत् अयं कार्यक्रमः युवानः नूतनप्रौद्योगिक्यै सज्जीकर्तुं सह तान् भारतस्य ज्ञानपरम्परायाः धरोहरेण सह संयोजयितुम् अपि प्रयत्नं करोति। तेन इदमपि उक्तं यत् भारतीयभाषाणां कृते कृत्रिमबुद्धिमत्ताम् आधृतानां उपकरणानां विकासस्य अत्र व्यापकाः सम्भावनाः सन्ति।

## ए.आई. तथा संस्कृतस्य संयोगः

अनेन उल्लेखेन संस्कृतस्य अध्यापनस्य अवलोकनस्य च पद्धतौ महत्त्वपूर्णं परिवर्तनं रेखाङ्कितम् अस्ति। कदाचित् मुख्यतया वेदेषु, शास्त्रीयसाहित्ये, दर्शने, कर्मकाण्डे च सम्बद्धा भाषा इति मन्यमाना संस्कृतभाषा अधुना कृत्रिमबुद्धिमत्ता, दत्तांशविज्ञानम्, आयुर्वेदः, विधिः, सिविलसेवाः, अङ्कीयसंरक्षणम् इत्यादिभिः क्षेत्रैः सह अपि सम्बद्धा भवति। कृत्रिमबुद्धिमत्ता, प्राकृतिकभाषासंसाधनम्, यन्त्राधिगमः तथा दत्तांशविज्ञानम् इत्येतैः सह संस्कृतस्य वर्धमानः सम्बन्धः तस्यै नूतनां प्रासङ्गिकतां प्रददाति।

## पाणिनेः व्याकरणं सङ्गणनं च

ईसापूर्वं षष्ठ-पञ्चमशताब्द्योः व्याकरणाचार्यः पाणिनिः। तस्य अष्टाध्यायी, या स्वस्य सटीकनियमैः सूत्रैश्च प्रसिद्धा अस्ति, सङ्गणकीयभाषाविज्ञाने वर्धमानरुचेः केन्द्रं भवति। संस्कृतस्य प्रौद्योगिक्या सह सङ्गमेन नूतनाः शैक्षणिकाः व्यवसायिकाश्च अवसराः अपि सम्मुखम् आगच्छन्ति।

## अङ्कीयसंरक्षणं ओ.सी.आर. च

प्राचीनपाण्डुलिपीनां अङ्कीकरणमपि उदयमानम् क्षेत्रम् अस्ति। ब्राह्मी-शारदा-प्रभृतिषु प्राचीनलिपिषु लिखितानां संस्कृतपाण्डुलिपीनां ग्रन्थानां च कृते प्रकाशीय-अक्षर-परिचय-प्रणालीनाम् (OCR) विकासः आह्वानपूर्णं भवितुम् अर्हति। संस्कृतविद्वांसः ओ.सी.आर्.-विकासकार्ये, लिप्यन्तरणे, सूचीकरणे, पाठसम्पादने, अङ्कीयसंरक्षणे च महत्त्वपूर्णं योगदानं दातुं शक्नुवन्ति। तेषां भूमिका केवलं शास्त्रीयग्रन्थानां व्याख्यानपर्यन्तं सीमिता नास्ति, अपितु यन्त्रेण निर्मितसामग्रीणां प्रमाणीकरणात् प्राचीनज्ञानस्य अङ्कीयमञ्जाय सज्जीकरणपर्यन्तं कार्यमपि तस्याः अन्तर्गतं भवितुं शक्नोति।

## आयुर्वेदः आधुनिकशिक्षा च

संस्कृतं पारम्परिकज्ञानस्य आधुनिकशिक्षया सह संयोजनस्य कार्यं 7.5 वर्षीय-आयुर्वेद-गुरुकुलमार्गेण अपि करोति। अस्मिन् द्विवर्षीयं पूर्व-आयुर्वेदाध्ययनम्, सार्धचतुर्वर्षीयः बी.ए.एम.एस. पाठ्यक्रमः, एकवर्षीयं च प्रशिक्षणम् अन्तर्भवति। संस्कृतस्य आधारभूतेन शिक्षणेन विद्यार्थिभ्यः चरकसंहिता, सुश्रुतसंहिता इत्यादीनां शास्त्रीयग्रन्थानां अध्ययनस्य अवसरः प्राप्यते, यदा ते आधुनिकचिकित्साशिक्षामपि प्राप्नुवन्ति। संस्कृतम् अद्य भारतस्य बौद्धिकपरम्पराणां विधिपरम्पराणां च अवगमनस्य प्रवेशद्वारमपि प्रददाति। धर्मशास्त्रम्, मीमांसा, अर्थशास्त्रम् इत्यादीनां विषयाणाम् अध्ययनं कुर्वन्तः विद्यार्थी अनुसन्धानम्, अनुवादः, तुलनात्मकाध्ययनम्, शास्त्रीयविधिसम्बद्धग्रन्थानां संरक्षणम् इत्यादिषु क्षेत्रेषु अग्रे गन्तुं शक्नुवन्ति।

## सिविलसेवा तथा व्यवसायिकाः अवसराः

संस्कृतं सिविलसेवासु अन्यासु च प्रतियोगितापरीक्षासु अपि एकः विकल्पः वर्तते। संस्कृतम्, भारतीयदर्शनम्, संस्कृतिः भारतीयज्ञानपरम्परा च संयोजयन्तः बी.ए. ऑनर्स्-प्रभृतयः कार्यक्रमाः शैक्षणिकानां व्यवसायिकानां च अवसराणां विस्तारं कर्तुं शक्नुवन्ति।

केन्द्रीयसंस्कृतविश्वविद्यालयस्य कुलपतिः प्रो. श्रीनिवास वरखेडी महोदयः बलं दत्तवान् यत् उदयमानाः प्रौद्योगिक्यः संस्कृतस्य विशालस्य ग्रन्थभाण्डारस्य भारतस्य पारम्परिकज्ञानपरम्परायाश्च संरक्षणे विस्तारस्य च साहाय्यं कर्तुं शक्नुवन्ति। तेषां मतानुसारं संस्कृतदिवसस्य अवसरे दृश्यते एतद् परिवर्तनं भाषायाः परिवर्तमानां भूमिकां प्रदर्शयति—या अधुना केवलं धरोहरस्य संरक्षणपर्यन्तं सीमिता नास्ति। पाण्डुलिपिभ्यः अङ्कीय-दत्तांशकोशेभ्यः च आरभ्य पाणिनेः व्याकरणात् कृत्रिमबुद्धिमत्तापर्यन्तं संस्कृतं भारतस्य बौद्धिकधरोहरां आधुनिकशिक्षया, प्रौद्योगिक्या, युवसन्ततेः भविष्यस्य व्यवसायिकावसरैश्च सह संयोजयति।

जयपुरस्थस्य राजस्थानसंस्कृतविश्वविद्यालयस्य दर्शनशास्त्रसंकायस्य अध्यक्षः शास्त्री कोसलेन्द्रदासः अवदत् यत् संस्कृतम् अधुना केवलं प्राचीनग्रन्थेषु पारम्परिकप्रथासु च सीमिता नास्ति, अपितु आधुनिकप्रौद्योगिकीयमञ्चेष्वपि स्वस्य उपस्थितिं निरन्तरं सुदृढां करोति।

# "संस्कृत कथा मञ्जरी"

## ।।द्वात्रिंशत्पुत्तलिकासिंहासनम्।।

### "अथ कृतज्ञतापरीक्षणं नाम चतुर्थोपाख्यानम्"



पुनः सिंहासनामारुरुढुं भूपतिं प्रतिरुध्य, तेन च पृष्टा अन्या पुत्तलिका वदति स्म- भो राजन्! श्रूयताम्- विक्रमादित्ये राज्यं कुर्व्वति, एकदा ब्राह्मणः कश्चित् सकलविद्याविचक्षणः, समस्तगुणगणालङ्कृतोऽपि अपुत्र समभवत्। कदाचित् भार्य्यया भणितं- भो प्राणेश्वर! पुत्रं विना गृहस्थस्य गतिर्नास्तीति स्मृतिविदो वदन्ति। ब्राह्मणेनोक्तं- भो प्रिये! सत्यमुक्तं त्वया परं परोद्यमेन द्रव्यं लब्धुं शक्यते, गुरुशुश्रूषया विद्याऽपि लभ्यते, यशः सन्ततिश्च परमेश्वराराधनं विना न सिद्ध्यति। भार्य्ययोक्तं- भवान् सर्व्वज्ञः, अतः परमेश्वरप्रसादाय किमपि व्रतादिकमनुष्ठेयम्। तेनोक्तं मयाऽप्यङ्गीकृतमेव त्वद्वचनमृत, कुतः? इत्युक्त्वा ब्राह्मणः परमेश्वरप्रीत्यर्थं रुद्रानुष्ठानं कृतवान्। ततः एकदा रात्रौ तं ब्राह्मणं स्वप्ने जटामुकुटधारी वृषभवाहनः भूतभावनः भवानीपतिः प्रत्यक्षीभूय उवाच- भो ब्राह्मण! त्वं प्रदोषव्रतम् आचर, तेन व्रताचरणेन तव पुत्रो भविष्यति। ततः प्रभाते ब्राह्मणेन वृद्धानां पुरतः स्वस्वप्नवृत्तान्तः कथितः। तैरुक्तं- भो ब्राह्मण! यथार्थोऽयं स्वप्नः।

अस्मिन् व्रतेऽनुष्ठिते तव पुत्रो भविष्यति इति तेषां वचनं श्रुत्वा ब्राह्मणो मार्गशीर्षे शुक्लत्रयोदशीतिथौ शनिवारे कल्पोक्तविधिपूर्व्वकं प्रदोषव्रतमनुष्ठितवान्। तेन व्रताचरणेन परमेश्वरः प्रसन्नो भूत्वा पुत्रमस्मै प्रायच्छत्। तदनन्तरं पुत्रे जाते, तस्य पुत्रस्य ब्राह्मणो जातकर्म्म विधाय द्वादशदिवसे तस्य ' देवदत्तः' इति नामकरणं कृत्वा यथाकाले अन्नप्राशनाद्युपनयनान्तानि कर्म्माणि अकार्षीत्। ततः उपनीतं वेदशास्त्रादिकं शिक्षयित्वा, षोडशे वर्षे गोदानानन्तरं विवाहं कारयित्वा स्वयं तीर्थयात्रां कर्तुकामः पुत्राय बुद्धिम् उपदिशति- भो पुत्र! अतिकष्टां दशां प्राप्तोऽपि स्वधर्माचारं न परित्यज, परैः सह विवादं मा कुरु, सर्वभूतेषु दया कार्य्या, परमेश्वरे भक्तिः विधेया, परस्त्री नावलोकनीया, बलवद्विरोधं मा कुरु, मन्मेज्ञेषु अनुवृत्तिः विधेया, प्रस्तावसदृशं वक्तव्यं, स्ववित्तानुसारेण व्ययः करणीयः, सज्जनाः सेवनीयाः, दुर्जनाः परिहर्तव्याः, अपराधिषु क्षमा कर्तव्या, स्त्रीणां गुह्यं न वक्तव्यम्। एवमनेकधा पुत्राय हितमुपदिश्य च वाराणसीं जगाम। देवदत्तोऽपि पितुरुपदेशं परिपालयन् तत्रैव नगरे स्थितः। एकदा होमसमिधाहरणार्थं महारण्यं प्रविष्टो यावत् समिधः छिनत्ति, तावद्विक्रमार्को राजा मृगयार्थं वनं गतः शूकरमनुधावन् महारण्यं प्रविष्टः पुरः मार्गम् अजानन् देवदत्तं दृष्ट्वा नगरमार्गमपृच्छत्। तेन पृष्टो देवदत्तः स्वयमग्रे गच्छन् राजानं नगरमानयत्। ततो राजा देवदत्तं सन्मान्य,कस्मिंश्चिद्व्यापारे नियुक्तवान्। तदनन्तरं कालो महान् गतः। एकदा राजा भणितं- कथमहं देवदत्तकृतोपकारादुत्तीर्णः भविष्यामि? यदनेन महतोऽरण्यामध्यात् ग्राममानीतः। तद्राजवचनं श्रुत्वा देवदत्तेन स्वमनसि विचारितम्, अहो! सत्पुरुषः अयं कृतमुपकारं न विस्मरति।

क्रमशः.......

**डा. वर्षा प्रकाश टोणगांवकर©®**
**पुणे, महाराष्ट्रम्**

# लोकसभायां ५४३ सदस्यसङ्ख्या किमर्थं ५४३ एव भवेत्?



देवेशविद्यार्थी 'संस्कृतभाषी'

लोकसभायां वर्तमाने ५४३ निर्वाचिताः सदस्याः सन्ति। एषा संख्या दीर्घकालात् प्रचलिता अस्ति। किन्तु अद्य भारतस्य जनसङ्ख्या,, मतदातृणां सङ्ख्या, निर्वाचनक्षेत्राणां विस्तारः तथा लोकतान्त्रिकप्रतिनिधित्वस्य आवश्यकताः पूर्वापेक्षया बहुधा परिवर्तिताः सन्ति। अतः अद्य एकः अत्यन्तं स्वाभाविकः प्रश्नः उदेति—५४३ किमर्थं ५४३ एव भवेयुः?

यदि जनसङ्ख्या वर्धते, मतदातृणां सङ्ख्या वर्धते, निर्वाचनक्षेत्रस्य आकारः वर्धते, तर्हि लोकसभायाः सदस्यसङ्ख्यायाः पुनर्विचारः किमर्थं न भवेत्?

अत्र प्रथमम् एकं तथ्यं स्पष्टं करणीयम्—५४३ इति सङ्ख्या अपरिवर्तनीयः संवैधानिकाङ्कः नास्ति। संविधानस्य अनुच्छेदः ८१ लोकसभायां राज्येभ्यः तथा केन्द्रशासितप्रदेशेभ्यः प्रतिनिधित्वस्य व्यवस्थां करोति। परिसीमनमाध्यमेन निर्वाचनक्षेत्राणां सीमाः तथा आसन्दवितरणं परिवर्तयितुं शक्यते।

**सङ्ख्या न, प्रतिनिधित्वस्य प्रश्नः-** परन्तु परिसीमनस्य चर्चायां सामान्यतः एकः प्रश्नः अधिकं प्रमुखः भवति—कस्य राज्यस्य कति आसनानि वर्धिष्यन्ते?

**वास्तविकतः प्रश्नः एतादृशः भवितव्यः—**

एकेन लोकसभा-सदस्येन कति नागरिकाः प्रतिनिधीयन्ते? एषः एव लोकतान्त्रिकप्रतिनिधित्वस्य मूलप्रश्नः।कल्पयामः—परिसीमनस्य अनन्तरम् उत्तरप्रदेशस्य लोकसभा-आसनानि ८० तः १२० पर्यन्तं वर्धन्ते। अपरतः तमिळनाडोः आसनानि ३९ तः ५९ पर्यन्तं वर्धन्ते। अत्र केवलं सङ्ख्यां दृष्ट्वा कश्चित् वक्तुं शक्नोति यत् उत्तरप्रदेशस्य लाभः अधिकः अभवत्। किन्तु एषा तुलना पर्याप्ता नास्ति।

उत्तरप्रदेशे ४० आसनानां वृद्धिः अभवत्, तमिळनाडौ २० आसनानां वृद्धिः। किन्तु यदि तयोः जनसङ्ख्यावृद्धेः तथा आसनवृद्धेः अनुपातः समीचीनः अस्ति, तर्हि वास्तविकी आनुपातिकता यथावत् एव स्थातुं शक्नोति। अतः प्रश्नः "कस्य कति आसनानि?" इति न, अपितु— "कस्य राज्यस्य एकस्य सांसदस्य पृष्ठे कति नागरिकाः सन्ति?"»इति भवेत्।

**५४३ इति संख्या कियती पर्याप्ता?**

भारतस्य जनसङ्ख्या स्वतन्त्रताप्राप्तेः समयात् अद्यपर्यन्तं बहुधा वर्धिता। तेन सह मतदातृणां सङ्ख्या अपि वर्धिता। किन्तु लोकसभायाः सदस्यसङ्ख्या तादृशेन अनुपातेन न वर्धिता।

एतादृशे सन्दर्भे विचारणीयं भवति—किं ५४३ सदस्याः सम्पूर्णस्य भारतस्य प्रभावीप्रतिनिधित्वाय पर्याप्ताः? यदि एकः सांसदः अत्यन्तविशालस्य निर्वाचनक्षेत्रस्य प्रतिनिधित्वं करोति, तर्हि तस्य जनसम्पर्कः, स्थानीयसमस्यानाम् अवगमनं तथा प्रत्येकस्य नागरिकस्य स्वरस्य संसद्पर्यन्तं सम्प्रेषणं कठिनतरं भवितुम् अर्हति।

अतः लोकसभायाः सदस्यसङ्ख्यायाः वृद्धिः केवलम् "अधिकाः सांसदाः" इति न द्रष्टव्यम्। तत् अधिकं प्रभावी प्रतिनिधित्वम् इति दृष्ट्या अपि परीक्षितव्या।

**विश्वस्य लोकतन्त्राणाम् अनुभवः**

विश्वस्य अन्यानि लोकतन्त्राणि दर्शयन्ति यत् संसदः सदस्यसंख्या प्रत्येकदेशे भिन्ना भवति।

संयुक्तराज्य-अमेरिकायाः प्रतिनिधिसभायां ४३५ मतदान-अधिकारयुक्ताः सदस्याः सन्ति। अमेरिकायाः जनसङ्ख्या बहुधा वर्धिता, किन्तु प्रतिनिधिसभायाः सदस्यसङ्ख्या ४३५ इत्येव स्थिरा अस्ति।

स्विट्जरलैण्डे राष्ट्रियपरिषदि २०० सदस्याः सन्ति। १९६३ तः एषा संख्या २०० इत्येव स्थिरा अस्ति।

हङ्गेरीदेशे तु विपरीतं परिवर्तनं दृष्टिगोचरम् अभवत्। तत्र पूर्वं ३८६ सदस्याः आसन्; निर्वाचनसुधारस्य पश्चात् सङ्ख्या १९९ पर्यन्तं न्यूनीकृता।

एतानि उदाहरणानि एकं तथ्यं स्पष्टयन्ति—संसदः सदस्यसङ्ख्या जनसङ्ख्यायाः यान्त्रिकरूपेण अनुसरणं न करोति। प्रत्येकदेशः स्वस्य संवैधानिकव्यवस्था, संघीयसंरचना, निर्वाचनपद्धतिः तथा प्रशासनिक-आवश्यकतानुसारं संसदः आकारं निर्धारयति। अतः भारतस्य कृते अपि प्रश्नः केवलं "अन्यदेशेषु कति सदस्याः?" इति नास्ति। प्रश्नः अस्ति—भारतस्य वर्तमानपरिस्थितौ कियती सदस्यसङ्ख्या सर्वाधिकं प्रभावी प्रतिनिधित्वं दास्यति?

## १९७१-जनगणना तथा संविधानसंशोधनानि

भारतस्य परिसीमनस्य इतिहासे १९७१-जनगणनायाः विशेषमहत्त्वं वर्तते। जनसङ्ख्यायाः आधारात् लोकसभा-आसनानां राज्यानुसारं पुनर्वितरणस्य सम्भावितप्रभावं दृष्ट्वा संविधानसंशोधनैः परिसीमनसम्बद्धे व्यवस्थायां स्थगनं कृतम्।

४२तमेन संविधानसंशोधनेन (१९७६) लोकसभायां राज्यवार आसनवितरणस्य पुनर्समायोजनं तथा परिसीमनं निश्चितकालपर्यन्तं स्थगितम्।अनन्तरं ८४तमेन संविधानसंशोधनेन (२००१) एषः स्थगनकालः २०२६ पर्यन्तं विस्तारितः।

एते निर्णयाः केवलं निर्वाचन-तकनीकीनिर्णयाः न आसन्। तेषां पृष्ठे एकः महत्त्वपूर्णः विचारः आसीत्—येषु राज्येषु जनसंख्या-नियन्त्रणस्य दिशि महत्त्वपूर्णं कार्यं कृतम्, तेषां राज्याणां राजनैतिकप्रतिनिधित्वं केवलं जनसङ्ख्या-आधारितपरिवर्तनस्य कारणेन प्रतिकूलतया प्रभावितं न भवेत्।

अतः आगामी परिसीमनं केवलं जनसंख्यायाः गणितं न भवेत्। तत्र जनसंख्या, प्रतिनिधित्वस्य समानता तथा संघीयसन्तुलनम्—एतेषां त्रयाणां सम्यक् विचारः आवश्यकः। उत्तरप्रदेशेन सह तमिळनाडुराज्यस्यतुलना—किं वास्तविकः संघर्षः? उत्तरप्रदेशस्य आसनानि वर्धन्ते चेत् तमिळनाडोः हानिः भवेत्—इति सरलीकृतः निष्कर्षः समीचीनः नास्ति। यथा—यदि उत्तरप्रदेशस्य आसनानि ८० तः १२० भवन्ति तथा तमिळनाडोः ३९ तः ५९ भवन्ति, तर्हि उभयोः राज्ययोः प्रतिनिधित्वं वर्धते।

तत्र मुख्यं मापनं भवेत्—

**जनसंख्या ÷ लोकसभासदस्यसङ्ख्या= प्रति-सांसद् प्रतिनिधित्वभारः**

यदि आसनवृद्ध्या प्रति-सांसद् जनसंख्या तुल्यतया अथवा समीपस्थतया तिष्ठति, तर्हि प्रतिनिधित्वस्य आनुपातिकता मूलतः अक्षुण्णा भवितुं शक्नोति।अतः उत्तरभारत-दक्षिणभारतयोः संघर्षरूपेण एतस्य प्रश्नस्य प्रस्तुतिः अपेक्षया समानप्रतिनिधित्वस्य प्रश्नरूपेण प्रस्तुतिः अधिकोत्तमा।

**किं लोकसभायाः सदस्यसङ्ख्या वर्धनीया?**

अस्य प्रश्नस्य गम्भीरतया विचारः करणीयः। यदि भारतस्य जनसङ्ख्या तथा मतदातासङ्ख्या बहुधा वर्धिता अस्ति, तर्हि ५४३ इति सङ्ख्या अपरिवर्तनीयतया एव स्थापनीया इति पूर्वनिर्धारितः निष्कर्षः भवितुं नार्हति।लोकसभायाः सदस्यसङ्ख्यां वर्धयित्वा निर्वाचनक्षेत्राणाम् आकारं न्यूनीकर्तुं शक्यते। सांसदानां प्रतिनिधित्वभारः अपि न्यूनीकर्तुं शक्यते। तेन सांसदाः स्वक्षेत्रस्य नागरिकानां समस्याः अधिकं प्रभावेण संसदः समक्षं स्थापयितुं शक्ष्यन्ति।

किन्तु सदस्यसङ्ख्या वर्धयितुं पूर्वं निर्वाचनव्यवस्थायाः सम्पूर्णं गणितं, संघीयसन्तुलनं, राज्यवारप्रतिनिधित्वम् तथा प्रशासनिकदक्षता च विचारणीया। अन्तिमप्रश्नः-अतः अधुना समयः केवलम् एतत् प्रष्टुं नास्ति—

**"लोकसभायां ५४३ सदस्याः किमर्थम्?"**

अपितु अस्माभिः पृष्टव्यम्—

"५४३ सदस्याः अद्य भारतस्य प्रत्येकस्य नागरिकस्य प्रभावीप्रतिनिधित्वाय पर्याप्ताः किम्?"

यदि उत्तरं "न" इति अस्ति, तर्हि नूतनविकल्पानां विषये चिन्तनं करणीयम्।

उत्तरप्रदेशस्य ८० आसनानि १२० भवन्तु, तमिळनाडोः ३९ आसनानि ५९ भवन्तु, अथवा अन्येषां राज्याणां आसनसंख्याः परिवर्तन्ताम्—केवलं संख्या-वृद्धिः समस्या नास्ति। वास्तविकी समस्या अस्ति—

«एकस्य मतस्य प्रतिनिधित्वं कियत् प्रभावी?

एकेन सांसदेन कति नागरिकाः प्रतिनिधीयन्ते? तथा सम्पूर्णस्य संघस्य राजनैतिकसन्तुलनं कियत् न्यायपूर्णम्?अतः ५४३ इति संख्या श्रद्धया संरक्षितुं न, अपितु तर्केण परीक्षितुं अर्हति।

**५४३ किमर्थं ५४३ एव भवेयुः?**

यदि देशः परिवर्तितः, जनसंख्या परिवर्तिता, मतदातृसमाजः परिवर्तितः, निर्वाचनस्य आवश्यकताः परिवर्तिताः—तर्हि प्रतिनिधित्वस्य संरचनायाः पुनर्विचारः अपि स्वाभाविकः एव।

लोकतन्त्रस्य शक्तिः केवलं निर्वाचनस्य अस्तित्वे नास्ति; लोकतन्त्रस्य वास्तविकं बलं प्रत्येकस्य नागरिकस्य स्वरस्य न्यायपूर्णप्रतिनिधित्वे अस्ति।

